स्कन्धादाशु नवोदितार्ककिरणछायं दुकूलाञ्चलम् ।
उद्युक्तस्त्वपनेतुमम्बुजदृशोर्यावद्धि गात्रान्तरे
दुर्दैवेन हि कारितः कलकलश्चोरं प्रवेश्यालये ।।

(सखेदं) हन्त -

उन्मुच्य कञ्चुकमुरोजयुगं निपीड्य
स्वाघ्राय वक्त्रमधरं मधुरं निपीय ।
पश्चाद्दुकूलमपनीय लभेहमिष्ट-
मेवं वृथाभिलषितैः क्षणदेव नीता ।।

(सोन्मादं)

कान्तेऽधुना तिमिरनिष्फलितेक्षणस्त्वां-
हस्तौ प्रसार्य कथमप्यहमस्मि लब्ध्वा ।
किं मां पुनः पुनरपि श्रम यस्य नाथं
मामैव मे हि सफली कुरु मे प्रयासम् ।।

(स्मृतिमधिगम्य) हन्त ! इदानीमेव खलु ! निर्गता प्रियतमा ।

(सकरुणं) हा प्रिये ! एवं विलपन्तमनाथं मां विहाय क्व गतासि ? कथं वा वर्तसे ?

[नेपथ्ये]

इच्छन्तो यजिनीं प्रभातसमये भृङ्गो रवे त्वां हृदि-
ध्यायत्येष नचास्यतेऽपि गणना चित्रं न चैतद्यतः ।
मेघोऽनन्यगतेश्चचातकशिशोर्गर्जन्कदाचिन्मुहुः-
द्वित्रान्वारिकणान्प्रयच्छति शनैश्चित्रं प्रभुत्वस्य तत् ।।

(आकर्ण्य, सोद्वेगं) हन्त ! सूचितमेतेनभास्वदुपालम्भेन कालिन्दीमदर्थं ताम्यतीति । (क्षणं . विचिन्त्य, दीर्घं निःश्वस्य) किमेतेनासम्भावितेन असुकरं खल्वेतत् ।

[पुनर्नेपथ्ये]

भृङ्गराज ! मा निराशो भव !

अयं समारोहति चण्डभानु-
र्निशाक्षये पूर्वमहीध्रशृङ्गम् ।
विवर्णभूता नलिनी निशायां
तवोपभोगाय भविष्यतीयम् ।।

(सहर्षं) सरोऽभितः परिभ्रमन्तं भृङ्गमाश्वासयता कालिन्दीसहोदरेण तरङ्गेणाहमायाश्वासितश्चास्मि ।

(श्रुतिमभिनीय, सर्वतोविलोक्य) कथं प्रभातप्रायेव रजनी ।

तथाहि -

भृङ्गावलिर्बहिरुपैति सरोजकोशा-
त्काकोपकण्ठमुपसर्पतिचक्रवाली ।
वृक्षेषु खं जनरुतैः प्र(ति)बोधितास्तु
कार्कास्वनैरभिरटन्ति विलम्ब्य काकाः ।।

किञ्च -

नाथस्यागमनं हि काकबिरुदैर्विज्ञाय हर्षाद्द्रुतं
कौसुम्भाम्बरभूषितेव च विभात्येषादिगैन्द्री पुनः ।
अन्या दक्षिणपश्चिमोत्तरदिशः सम्प्रेषितात्मप्रिया-
वैराग्यान्मलिनाम्बराः कृशतराः कान्ता इवाभान्ति च ।।

तदिदानीमेव द्रुततरं यथागतेन यथा बहिर्गच्छामि (इत्युत्थाय गृहप्राकारभित्तिमुल्लङ्घ्य वीथीं प्रविश्य, सौधानवलोक्य सहर्षखेदं)

मञ्चे स्वास्तृतचारुतूलशयने पर्यायदन्तैर्भुजै-
र्गाढालिङ्गनमाकलय्य वदनं वक्त्रेण संयोज्य च ।
वेणीवच्च मिथो दृढं सुनिवेश्योरून्स्वपन्ताविमौ-
स्त्रीपुंसौ तु विनाश्रमादलमतः पुण्यैकलभ्यं सुखम् ।।

(अन्यतो दृष्ट्वा, सकौतुकं)

स्विभानना परिहृताखिलभूषणा च
पीनस्तनी . . . द्रुतसुवर्णकान्तिः ।
व्यक्ता मुहुर्व्यवहिता च दृशोर्गवाक्षे
शं येव मन्मथघनस्य विभाति सैषा ।।

(केयमिति विचिन्त्य) ज्ञातमनया खलु ! कलानिधिदयितया चन्द्रिकया भवितव्यम् । दर्शनीया खल्वियं सर्वजननेत्रोत्सवदायिनी । हन्त ! कथमियं अदृश्या संवृता ? (इति सङ्कुचितलोचनं निपुणं निर्वर्ण्य, साश्चर्यं)

नीलाम्बरावृतभुजोदरपृष्ठमूर्धा-
सम्बद्धकच्छपुटवेशितशास्त्रमध्यः ।
कोऽयं नु साहसनिधिः स्वकरेण रज्जुं
धृत्वोन्नतादवतरत्यहहाशु सौधात् ।।

(पुनर्निरूप्य शातमयमस्मत्सुहृच्चकोरकः तदेनमुपसर्पामीति पदान्तरं गत्वा) सखे ! चकोरक ! किमेतत् ?

पाणौ प्रविततता रज्जुः कण्ठे वकुलमालिका ।
करपांसु निशितं शास्त्रं अधरे रदनव्रणः ।।

चकोरकः - किं ब्रवीषि ? मदन कदनात्सबहुमानप्रत्यागमनमिति । कया कृतवानसि मदनसङ्गरम् ।

(अनुवर्तते)

श्रीः

॥ धन्यकुमारचरित्रम् ॥*

ओं नमस्सिद्धेभ्यः ।

नमः श्रीवर्धमानाय पञ्चकल्याणभागिने ।
जिनाय विश्वनाथाय मुक्तिभर्त्रे गुणाब्धये ॥ १

श्रीमन्तं त्रिजगन्नाथमादितीर्थप्रवर्तकम् ।
वृषभं वृषभाधीशं वन्देऽनन्तगुणाकरम् ॥ २

शेषांस्तीर्थकरान्सर्वान् विश्वमङ्गलकारिणः ।
लोकोत्तमान् शरण्यांश्च सदा नौमि जगद्धितान् ॥ ३

द्वीपेष्वर्धतृतीयेषु विहरन्तो जिनाधिपाः ।
नृदेवखचराधीशैर्भूषिता गणनायकैः ॥ ४

ये श्री सीमन्धरस्वामिप्रमुखा धर्मवर्तिनः ।
मूर्ध्ना नमामि तान्विश्वान् मोक्षमार्गप्रकाशकान् ॥ ५

एते तीर्थङ्कराश्चान्ये त्रिकालगोचराः मया ।
वन्दिता संस्तुतास्सन्तु मे प्रारब्धार्थसिद्धये ॥ ६

अष्टकर्माङ्गदूरा ये महाष्टगुणभूषिताः ।
त्रैलोक्यशिखरारूढाः त्रिजगत्स्वामिवन्दिताः ॥ ७

अनन्तसुखसंलीना ध्येयास्तद्गुणकाङ्क्षिभिः ।
तत्पदार्तिभवत्रस्तः प्रत्यहं तान्स्मराम्यहम् ॥ ८

षट्त्रिंशत्सद्गुणैर्युक्तान् पञ्चाचारपरायणान् ।
सूरीन्वन्दे जगद्वन्द्यान् शिष्यानुग्रहकारिणः ॥ ९

---

* Green No. 869 (a) (Pl - P. No. 90-140) T. M. S. S. M. Library, Thanjavur.

पठन्ति पाठयन्त्यन्यान् येऽङ्गपूर्वसुधारसान् ।
जन्मदाहविनाशाय स्तौमि तान् पाठकांश्चिदे ॥ १०

रत्नत्रयं च सम्पूर्णं त्रिकालयोगमद्भुतम् ।
ये साधयन्ति मोक्षाय स्वशक्तिं मे सृजन्तु ते ॥ ११

सर्वे वृषभसेनाद्या गौतमान्ता गणाधिपाः ।
समस्तर्द्धि चतुर्ज्ञानालङ्कृता गुणसागराः ॥ १२

त्रिजगत्पतिवन्द्याच्र्याः कृत्स्नाङ्गरचने क्षमाः ।
मयाऽऽत्र संस्तुतास्सन्तु मे स्वबुद्धिं गुणाप्तये ॥ १३

अन्ये ये कवयोऽत्र श्री कुन्दकुन्दादि सूरयः ।
विख्यातास्सर्वसिद्धान्ताम्बुधेःपारङ्गता विदः ॥ १४

दृग्ज्ञानादि महारत्नालङ्कृता ग्रन्थवर्जिताः ।
दिगम्बरधराः स्तौमि तान् गरिष्ठान्गुणैर्गुरून् ॥ १५

अङ्गपूर्वप्रकीर्णाङ्गाः स्त्रिरत्नभूषणान्विताः ।
तत्ववस्त्रावृताऽऽनन्तशर्मदा गुणमण्डिताः ॥ १६

जिनेन्द्रस्याम्बुजोत्पन्ना वर्धितागणनायकैः ।
भारती संस्तुता वन्द्या मेऽस्तु सर्वार्थसिद्धये ॥ १७

शेषान्योगीश्वरान्धन्यकुमारप्रमुखान् परान् ।
बाह्यान्तर्ग्रन्थनिर्मुक्तान् युक्तान्सद्गुणभूतिभिः ॥ १८

विश्वभव्यहितोद्युक्तान् संसाराम्बुधिपारगान् ।
तद्गुणाय स्तुवे भक्त्या सर्वार्थसिद्धिसाधकान् ॥ १९

इत्यभिष्टुत्य तीर्थेशान् सिद्धांश्च सद्गुरून्परान् ।
स्वेष्टान् मङ्गलकर्तृश्च नत्वा माङ्गल्यसिद्धये ॥ २०

स्व प्रारब्धार्थसिध्यर्थं विघ्नहान्यै शिवाप्तये ।
स्वान्येषां हितमुद्दिश्य करिष्ये कर्महानये ॥ २१

चरित्रं पावनं धन्यकुमारस्य शुभावहम् ।
वैश्य सत्कुलदीपस्य सर्वार्थस्सिद्धगामिनः ॥ २२

येन श्रुतेन भव्यानां हीयते रोगशत्रवः ।
वर्धन्ते शुभसंवेगशमादिगुणराशयः ॥ २३

अनेनास्य चरित्रेण कीर्तयिष्यामि सत्फलम् ।
महत्सत्पात्रदानस्य स्वर्गश्रीसुखकारणम् ॥ २४

यतो धन्यकुमारोऽयं पात्रदानफलेन भोः ।
स्वर्गश्रीनिधिभोक्तासीद्राज्यभूतिविराजितः ॥ २५

अथ द्वीपोऽस्ति जम्ब्वाख्यो जम्बूवृक्षोपलक्षितः ।
लक्षयोजनविस्तीर्णो वृत्ताकारोऽब्धिवेष्टितः ॥ २६

मेरुर्हेममयो भाति तन्मध्येऽतीवसुन्दरः ।
लक्षैकयोजनोत्तुङ्गो जिनलयाप्सरोऽमरैः ॥ २७

मेरोर्दक्षिणदिग्भागे राजते क्षेत्रमुत्तमम् ।
भारतं[1] चापसादृश्यं विद्येशनृसुरादिभिः ॥ २८

तन्मध्ये शोभतेऽतीव सुन्दरं धर्मकारणम् ।
आर्यखण्डं[2] बुधैश्चार्यैर्धार्मिकैः श्रीजिनादिभिः ॥ २९

अवन्तीविषयस्तत्र विद्यते सन्नरैर्भृतैः ।
ग्रामखेटपुराद्यैश्च रम्यः स्वर्मोक्षकारकः ॥ ३०

---

1. जम्बूद्वीपे, भारतवर्षे, भरतःखण्डे, मेरोःदक्षिणेपार्श्वे-इति दैनन्दिन सङ्कल्पः ।
2. आर्यावर्तः पुण्यभूमिः मध्यं विन्ध्यहिमालयोः - इत्यमरः ।

यत्राचार्याः उपाध्यायाः साधवो गणनायकाः ।
केवलज्ञानिनो भूत्या विहरन्ति जगद्धिताः ॥ ३१

पुरपत्तनसत्खेटग्रामादि भुवनादयः ।
राजन्ते यत्र योगीन्द्रैर्जिनागारैश्च धार्मिकैः ॥ ३२

यत्रोत्पन्नैः बुधैः केचित्तपसा साधते शिवम् ।
कैश्चित्सर्वार्थसिद्धिश्चापरैर्ग्रैवेयकादिकम् ॥ ३३

सर्वज्ञपूजया(कै)[1]श्चिल्लभन्ते दृग्विशारदाः ।
देवराजपदं चान्ये भोगभूमिं सुदानतः ॥ ३४

यत्र प्रवर्तते धर्मो महान् श्रीजिनभाषितः ।
श्रावकैर्मुनिभिर्दक्षैस्सर्वाभ्युदय साधकः ॥ ३५

तेन धर्मेण तत्रत्याः प्राप्नुवन्ति निरन्तरम् ।
शर्मसाराणि वस्तूनि सम्पदश्च पदे पदे ॥ ३६

यत्राहो निर्मलाचारैः साध्यन्ते धार्मिकैर्गुणैः ।
धर्मार्थकामनिर्वाणास्तत्र का वर्णना परा ॥ ३७

तन्मध्ये नाभिवद्भाति महत्युज्जयिनीपुरी ।
विद्धिश्च धर्मभिस्तुङ्गचैत्यालयै(लय)र्महोत्सवैः ॥ ३८

उत्तुङ्गगोपुरैस्तुङ्गप्राकारखातिकादिभिः ।
सुभटैः सा बभौ लोकेऽलङ्घ्ययोध्येव शत्रुभिः ॥ ३९

उत्तुङ्गाः विविधाकाराः श्राविकाः श्रावकैर्भृताः ।
राजन्ते श्रीजिनागारास्तूर्याद्यैः वृषपूरिताः ॥ ४०

यस्यां सुधार्मिकाः प्रातरुत्थाय शयनात्सदा ।
समायिकस्तवध्यानैः कुर्वते धर्ममुत्तमम् ॥ ४१

मध्याह्नेऽभ्यचर्य तीर्थेशान् स्वसौधे जिनधामसु ।
पश्यन्ति स्वगृहद्वारं पात्रदानाय दानिनः ॥ ४२

दिनजाताघनाशाय शुभाय च बुधोत्तमाः ।
कृत्वा सामयिकं शुद्ध्या महामन्त्रान्जपन्ति च ॥ ४३

इत्याद्यन्यैः शुभाचारैव्रतशीलादिपालनैः ।
पर्वोपवासपूजाद्यैःपौराः धर्मं प्रकुर्वते ॥ ४४

तत्फलेनाक्षशर्माणि भोगोपभोगसम्पदः ।
नारींश्च शुभगान् पुत्रांस्ते लभन्ते निजेच्छया ॥ ४५

यस्यां देवास्समीहन्तेऽहो स्वजन्मशिवाप्तये ।
उच्चैस्तरपदाप्त्यैर्वा तस्यां किं कीर्तनं परम् ॥ ४६

इत्यादि वर्णनोपेतनगर्यां स्यान्महीपतिः ।
प्रताप्यवनीपालाख्यः पुण्यधीर्धर्मवत्सलः ॥ ४७

धनपालाभिधो वैश्यो वसेत्तस्यां शुभाशयः ।
तस्य प्रभावती भार्या पुण्यलक्षणभूषिता ॥ ४८

सप्तपुत्रास्तयोरासन् देवदत्तादयोऽखिलाः ।
परस्परमतिस्नेहाः समाना गुणलक्षणैः ॥ ४९

ते केचिदक्षराभ्यासं कुर्वन्ते बालकाश्चिदे ।
व्यवहारं बृहत्पुत्राश्चान्ये तस्थुर्धनाप्तये ॥ ५०

अन्यस्मिन् दिवसे कृत्वा चतुर्थस्नानमन्तिमम् ।
सुप्ता प्रभावती भर्त्रा समं शय्यातले शुभात् ॥ ५१

यामिन्याः पश्चिमे यामे पूर्वपुण्यविपाकतः ।
स्वप्नेऽपश्यत्प्रवेशञ्च गृहद्वारे निजे शुभे ॥ ५२

उत्तुङ्गवृषभश्वेतस्यादौ कल्पद्रुमस्य च ।
फलितस्य ततश्चन्द्रादीनां सुदीप्तिशालिनाम् ॥ ५३

पर्यङ्कात्प्रातरुत्थाय स्वप्नदर्शनहर्षिता ।
सा सती धर्मसिध्यर्थं कृत्वा प्राभातिकक्रियाम् ॥ ५४

अभ्येत्य निजभर्तारं निवेदयत(द्य च) गिरा स्वयम् ।
यथा दृष्टान् शुभान् स्वप्नान् पुत्राभ्युदयसूचकान् ॥ ५५

तदाकर्णनतो दक्षो भूत्वा स हर्षिताननः ।
उवाचेति प्रियेऽमीषां फलात्तव भविष्यति ॥ ५६

त्यागी भोगी महान्पुत्रो वैश्यसत्कुलखांशुमान् ।
स्वगुणोज्वलकीर्त्याद्यैः त्रिजगद्धवलीकृतः ॥ ५७

तच्छ्रुत्वा सुतमात्तेव साऽऽगमन्मुदमुल्बणम् ।
ततोऽस्याः गर्भचिह्नानि प्रादुरासन् शुभाशयाः ॥ ५८

क्रमेणैषा मुदा नीत्वा नवमासान् शुभोदयात् ।
शुभे दिनमुहूर्तादौ सुखेनाजीजनत्परम् ॥ ५९

सुतोत्तमं लसत्कान्तिं महातेजोविराजितम् ।
दिव्यलक्षणपूर्णाङ्गं सुभगं सुन्दराकृतिम् ॥ ६०

तन्नालं किल निक्षेप्तुं पृथिव्याः खनने सति ।
तत् पुण्याद् द्रव्यसम्पूर्णः कटाहो निर्ययौ महान् ॥ ६१

पुनस्तन्मज्जनार्थं च खननेऽघस्थलाद्ध्रुवः ।
निर्जगाम कटाहोऽन्यो बहुद्रव्यभृतो महान् ॥ ६२

तद्वीक्ष्याशु वणिग्गत्वा नृपं हीति न्यवेदयत् ।
देव मेऽभून्महान् पुत्रो बहुद्रव्यं च निर्गतम् ॥ ६३

तदाकर्ण्य नृपोऽवादीदिति तं प्रतिनिस्पृहः ।
श्रेष्टिन्! यस्यातिपुण्येन यद्धनं निर्गतं भुवः ॥ ६४

तस्य स्वामी स एव स्यात्त्वत्पुत्रःपुण्यवान्महान् ।
नाहं परधनाकाङ्क्षी भवामि जातुभूतले ॥ ६५

ततः श्रे(ष्ठीसुसं)'तुष्टो गृहमागत्य तत्क्षणम् ।
सौधचैत्यालयेषूच्चैर्महापूजां विधाय च ॥ ६६

विभूत्या विश्वकल्याणकारिणीं विघ्ननाशिनीम् ।
सन्तर्प्य विविधैर्दानैः स्वजनान् याचकादिकान् ॥ ६७

गीतनर्तनवाद्याद्यैः केतुतोरणपङ्क्तिभिः ।
बन्धुभिस्सह चक्रे स्वपुत्रजातमहोत्सवम् ॥ ६८

सद्दिने दशमे तस्मात् महाभिषेकपूजनम् ।
विभूत्या विश्वचैत्यालयेषु कृत्वा महार्चनैः ॥ ६९

प्रीणयित्वेष्टदानाद्यैर्बन्धून् दीनादि याचकान् ।
अस्मिन् सुतोत्तमे जातेऽत्रास्मत्कुलदीपके ॥ ७०

जाता धन्याः कृतार्थाश्च वयमत्रेति बन्धवः ।
अयं धन्यकुमारोऽत्र तस्येति नाम वै व्यधुः ॥ ७१

ततः स सुन्दराकारो जगन्नेत्रप्रियो महान् ।
मात्रादीनां मुदं कुर्वन् स्मितमुग्धादि चेष्टितैः ॥ ७२

पयः पानादिभिर्योग्यैः भूषणाद्यैरलङ्कृतः ।
बुद्ध्यावयवकान्त्याद्यैर्ववृधे बालचन्द्रवत् ॥ ७३

क्रमात्पुनर्विमुच्याशु मुग्धावस्थां स आप्य च ।
कौमारत्वंतरां भाति गुणैर्देवकुमारवत् ॥ ७४

तदा तज्जनको भूत्या तीर्थकृच्छुतयोगिनाम् ।
विधाय पूजनं भक्त्या महाविद्यागुणाप्तये ॥ ७५

कलाविज्ञानवृद्ध्यर्थं पठनायतमूर्जितम् ।
कृत्वा महोत्सवं जैनोपाध्यायस्यार्पयन्मुदा ॥ ७६

सोऽतिप्राज्ञोऽचिराद्दक्षस्सद्विद्याशास्त्रवारिधेः ।
सद्बुद्धि यानपात्रेण ययौ पारं श्रिया शुभात् ॥ ७७

तदैष बहुशास्त्रज्ञः क्रमात्प्राप्य सुयौवनम् ।
ज्ञानविज्ञानसम्पन्नो विवेकी सद्गुणाकरः ॥ ७८

दिव्यरूपधरो धीमान् कीर्त्या व्याप्तमहीतलः ।
लक्षणैर्व्यञ्जनैः पूर्णः सुन्दराकारविग्रहः ॥ ७९

रूपलावण्यनेपथ्यवस्त्रमाल्यादि मण्डितः ।
सद्गुणैः राजते लोके कामदेव इव श्रिया ॥ ८०

निरन्तरमसौ त्यागी कुर्वन्नानाविधार्चनैः ।
(सर्व)[1] शास्त्र गुरूणां स्वधर्माय बहुसम्पदा ॥ ८१

सदा ददाति दानानि विविधानि निजेच्छया ।
दीनानाथजनादिभ्यः कृपया स शुभाशयः ॥ ८२

भुनक्ति सम्पदा नित्यं नाना भोगान् सुखाकरान् ।
कौमारपदयोग्यांश्च कुमारो मन्मथोपमः ॥ ८३

कदाचिद्देवदत्ताद्यास्तं त्यागी भोगमुल्बणम् ।
विलोक्य स्वेर्षयेत्याहुर्मातरं [2]बहुदुर्धियः ॥ ८४

---

1 - A 2. प्रति -A

उपार्जकाःवयं सर्वेऽत्रायमेको हि भक्षकः ।
धनादीनां क्वचित्किञ्चित् व्यवसायं करोति न ॥ ८५

प्रभावती तदाकर्ण्य प्राहेति श्रेष्ठिनं प्रति ।
श्रेष्टि त्वं व्यवहारस्य करणे योजय श्रिये ॥ ८६

सुतं धन्यकुमाराख्यं सौभाग्यं भाग्यशालिनम् ।
तदभावात् बृहत्पुत्रा अस्मिन्द्धेषं प्रकुर्वते ॥ ८७

सुमुहुर्ते ततश्श्रेष्ठी नीत्वा तं स्वसुतोत्तमम् ।
उपवेश्यापणे युक्त्या निक्षिप्याशु तदांशुके ॥ ८८

शतैकद्रव्यमेवात्रेत्यवादीद्धे सुत त्वया ।
दत्वेदं कस्यचिद्द्रव्यं ग्राह्यं किञ्चित्क्रियाणकम् । ८९

दत्वा किमपि चान्यद्धि किञ्चिद्धस्तु परीक्ष्य वै ।
यावद्भोजनकालस्ते भवेत्तावत्त्वमूर्जितम् ॥ ९०

कृत्वेत्थं व्यवहारं तत्पश्चाद्दत्वाकरेऽखिलम् ।
स्वभृत्यस्य गृहं भोक्तुं आगच्छेति निरुप्य सः ॥ ९१

गतो तेहं स तत्रैव तदास्ते च शुभाशयः ।
अङ्गरक्षयुतो धन्यकुमारोऽतीवरूपवान् ॥ ९२

तावद्धिक्रयितुं कश्चिच्चतुर्वृषभसंयुतम् ।
आनीतवान् शुभैःकाष्ठैर्भृतं शकटमूर्जितम् ॥ ९३

तेन द्रव्येण जग्राह कुमारस्तं निजेच्छया ।
दत्वा तदपि मेषञ्च लीलया सुगृहीतवान् ॥ ९४

दत्वा तदपि कस्मैचिदाऽऽदाय शुभपाकतः ।
शुभान्मञ्चकपादान् सस्ततःस्वगृहमाययौ ॥ ९५

तदाऽऽस्यागमने काले साऽऽनन्दा जननी मुदा ।
प्रथमेऽहनि पुत्रो मे व्यवहारं विधाय च ॥ ९६

आगतोऽत्रेति मत्वा प्रकुरुते सत्प्रभाविनाम् ।
ज्येष्ठपुत्रास्तदेत्यूचुर्विलोक्य तां तथाविधाम् ॥ ९७

अहो पश्य महच्चित्रमिदं मात्रा (कृतं)[1] परम् ।
शतद्रव्यं विनाश्यायमागतः प्रथमे दिने ॥ ९८

विरक्ता जननी जातु सन्मुखं नापि लोकते ।
दोषोऽस्या वात्र कः किन्तु दोषोऽस्मत्कर्मणां महान् ॥ ९९

सा तद्वचनमाकर्ण्य निधाय मानसे निजे ।
तेभ्यो धन्यकुमारस्य दत्वा सुभोजनं स्वयम् ॥ १००

भुक्त्वा काष्ठबृहत्पात्री भृतनीरेऽनुरागतः ।
प्रक्षालयितुमारेभे मञ्चकाङ्घ्रीन् करेण तान् ॥ १०१

तेषां प्रक्षालनेनाशु तरूपलादि मृत्तिका(न्) ।
अगाद्दूरं ततो मञ्चकपादमध्यभागतः ॥ १०२

कुमारोद्भुत पुण्येन स्फुरद्रत्नान्यनेकशः ।
सहसा गलितान्यत्र क्वचित्पत्रं च निर्गतम् ॥ १०३

कस्य मञ्चकपादास्ते लिखितं केन भूतले ।
तत्पत्रं कथमत्रेति प्रश्ने सत्याह तत्क्रमम् ॥ १०४

पूर्वमस्यां नगर्यां च वसुमित्राह्वयो महान् ।
आसीदत्रैव पुण्यात्स राजश्रेष्ठी महाधनी ॥ १०५

तस्यात्यद्भुत पुण्येन महान्तो निधयो नव ।
प्रादुरासन्महासौधे विश्वभोगोपभोगदाः ॥ १०६

कदाचित्ससुधीस्तस्या उद्यानमागतं मुनिम् ।
अवधिज्ञानसम्पन्नं नत्वा प्राक्षीदिति स्फुटम् ॥ १०७

भगवन्भवता कोऽग्रे सोऽतीव पुण्यवान्महान् ।
योऽस्मन्नवनिधीनां च सम्यङ्भोक्ता भविष्यति ॥ १०८

ततो ज्ञानी गिरेत्याहावधिज्ञानेन तं प्रति ।
सद्राज्येऽवनिपालस्य धनपालवणिक्पतेः ॥ १०९

पुत्रो धन्यकुमारस्ते निधिस्वामी भविष्यति ।
प्रागर्जितस्वपुण्येन बहुसम्पत्सुखाकरः ॥ ११०

तच्छ्रुत्वा वसुमित्रःस गत्वा स्वगृहमात्मनः ।
शुभालापेन चानेन ह्येतत्पुत्रं तदाऽऽलिखत् ॥ १११

श्रीमतोऽवनिपालाख्यमहीपतेश्शुभात्मनः ।
भूषितस्य महामण्डलेश्वरश्रीसुखादिभिः ॥ ११२

राज्ये धन्यकुमारो यो वैश्यसत्कुलपङ्कजः ।
दाता भोक्तातिधन्यात्मा पुण्यशाली भविष्यति ॥ ११३

स मद् गृहे स्थितो तस्मात् प्रदेशस्थान्निधीन्नव ।
गृहीत्वा स्व सुखेनात्र स्थेयाद्दानादि कारकः ॥ ११४

इति श्रेष्ठी लिखित्वैतत्पत्रं रत्नैःपरैस्समम् ।
तेषु मञ्चकपादेषु निक्षिप्यास्थात्स्वशर्मणे ॥ ११५

आयुष्यान्ते ततः श्रेष्ठी (सन्या)'सेन विमुच्य सः ।
प्राणान् पुण्यविपाकेन ययौ स्वर्गं सुखाकरम् ॥ ११६

तस्मिन् गतेऽति पुण्याढ्यो तद्गृहस्थाः जनाः परे ।
पुण्यहीना मृतास्सर्वे मरणे का शुभोदयात् ॥ ११७

तेषां मृतोऽन्तिमो योऽस्मादनेन मञ्चकेन सः ।
लोकैर्नीतैः श्मशाने हि संस्कारयितुमाशु हि ॥ ११८

तत्पादान् सकलान् धन्यकुमारः शुभपाकतः ।
जग्राह तत्र चाण्डालहस्तान्विधिप्रयोजितान् ॥ ११९

अहो सद्विधिरेवात्र घटितात्सुष्टु दुर्लभान् ।
दूरस्थान् महतोऽघौघान् घटयेच्च स्वयं सताम् ॥ १२०

तत्पत्रं स मुदादाय वाचित्वा चावबुध्य तान् ।
निधिस्थानादिकान् सर्वानभ्येत्य भूपतिस्ततः ॥ १२१

याचित्वा तद्गृहं युक्त्या व्याप्य पुण्यात्प्रविश्य च ।
निरीक्ष्य तान् निधीन् धन्यकुमारोऽगात् परां मुदम् ॥ १२२

तत्र धन्यकुमारोऽसौ स्वीकृत्य तन्निधीन्परान् ।
तज्जातद्रव्यकोटीभिः श्रीजिनश्रुतयोगिनाम् ॥ १२३

कुर्वन्नित्यं महापूजां समीहितफलप्रदाम् ।
सत्पात्रेभ्यः सुदानानि ददत्पुण्यकराणि च ॥ १२४

दीनानाथजनादिभ्यः कृपादानं तदीप्सितम् ।
उपकारं स्वजैनानां वितन्वन् बहुसम्पदाम् ॥ १२५

राज्यमान्यो महाकीर्त्या व्याप्तलोकत्रयोऽद्भुतः ।
भुञ्जानो विविधान् भोगान् स्वजनान्यजनप्रियः ॥ १२६

भजन् धर्मं शुभाचारैः सुखेनास्थात् स्वलीलया ।
शर्माऽऽमृताम्बुधौ मग्नोऽजानन् कालं गतं मुदा ॥ १२७

ङ्इत्थं पुण्यविपाकतो नवनिधीन् सम्प्राप्य सत्सम्पदोङ्ग-
सर्वत्राद्भुतभोगशर्मजननीर्मान्यं नृभूपादिभिः ।
भुङ्क्ते सौख्यमनारतं च कुमरो धन्यादिरत्रेत्यहो-
ज्ञात्वैकं सुखकामिनः सुचरणैः पुण्यं कुरुध्वं सदा ॥ १२८

पुण्यं पुण्यगुणाकरं ह्यघहरं पुण्यं श्रिता धीर्धनाः
पुण्येनेह समाप्यतेऽखिलसुखं पुण्याय पुण्यक्रिया ।
पुण्याच्छ्रीत्रिजगद्भवाः (भवति नु)[1] पुण्यस्य बीजं व्रतं
पुण्ये चित्रमनारतं बुधजनाधत्तस्वशर्माप्तये ॥ १२९

इति श्रीभट्टारकसकलकीर्तिविरचिते धन्यकुमारचरित्रे
धन्यकुमारजन्मनिधिलाभवर्णनो नाम
प्रथमोऽधिकारः

॥ श्रीरस्तु ॥

*****

॥ अथ द्वितीयोऽधिकारः ॥

धर्माधिपान् जगद्वन्द्यान् जगल्लोकोत्तमान् सताम् ।
शरण्यांस्त्रिजन्मङ्गलकारिणः (स्तु(युः) जिनान्)[1] ॥ १

अथैकदा तमालोक्य दिव्यरूपं स्फुरत्प्रभम् ।
कश्चिद्दिव्योऽवदद्धीमान्नित्थं तत्पितरं प्रति ॥ २

धनपाल मदीयां यत्पुत्रीं रतिनिभां शुभाम् ।
अहं धन्यकुमाराय दास्यामि भोगशर्मणे ॥ ३

धनपालस्ततो ब्रूतं त्वं ज्येष्ठाय प्रयच्छताम् ।
स बभाण न चान्यस्मै सुतां दास्यामि जातुचित् । ४

किन्तु धन्यकुमाराय वितरिष्यामि निश्चितम् ।
यदा कदाचिद्देवात्र मत्कन्यां रूपशालिनीम् ॥ ५

तदा परे वणिग्ज्येष्ठा मदात्मजां मदात्मजाम् ।
धन्यायै वात्र दास्यामोऽन्यस्मै नेति ब्रुवन्त्यहो ॥ ६

ते ज्येष्ठा भ्रातरो दुष्टास्तद्ज्ञात्वा तं शुभाशयम् ।
द्वेष्टुं लग्नाः प्रकुर्वन्तो मतिं तं मारणे तदा ॥ ७

शुद्धाशयः स पुण्यात्मा धर्मकर्मरतोऽनिशम् ।
तेषां दुष्टस्वभावदीन् न जानातिमना हृदि ॥ ८

एकदा पापिनः पापमन्त्रमालोच्य तेऽनयन् ।
उद्यानस्थां महावापिकां क्रीडितुं त मूर्जितम् ॥ ९

तत्तटे कुमरः प्रीत्योपविश्य निर्मलाशयः ।
जलक्रीडादिकांस्तेषां पश्यंस्तस्थौ कुतूहलात् ॥ १०

---

1 - A

आगत्य छद्मनैकेन वापिकायां स पापिना ।
पापपाकेन तत्कण्ठाग्निर्लोटितोऽतिशुद्धधीः ॥ ११

स नमो अरिहन्तारं इत्युच्चरन् (स) गिरा तदा ।
पपात शुभपाकेनात्यगाधे तज्जले शनैः ॥ १२

ते तस्योपरि पापिष्ठाः पाषाणादीन् बहून्परान् ।
हन्तुकामा हि निक्षिप्य मृतोऽत्रायं न संशयः ॥ १३

विधायेति स्व सन्तोषं गृहं जग्मुस्ततः खलाः ।
भव्याकृत्यं अहो तन्न पापिभिः क्रियते न यत् ॥ १४

इतः पूर्वं महापुण्योदयेन मन्त्रशक्तितः ।
तत्पु(ण्यप्रे)[1]रि ताभिः(च) पुण्यदेवता (वा)भिराशु च ॥ १५

आगताभिः कुमारोऽसौ धर्मध्यानपरायणः ।
जलनिर्गमरन्ध्रेण वाप्यां निःसारित(श्शनैः[2]) ॥ १६

अहो प्राक् श्रेयसां पुंसां स्वयं यान्ति वशं सुराः ।
विघ्नजालानि हत्वोपकारं कुर्वन्ति देवताः ॥ १७

मन्त्रजापोत्थपुण्येन विघ्नाः प्राणहरा द्रुतम् ।
नश्यन्त्यहो कृतादुष्टैः सिंहेनात्र यथा गजाः ॥ १८

सताश्च पुण्यपाकेन जल स्थलाद्युपद्रवाः ।
विघटन्तेऽल्पमृत्याद्या चौरराजभयादयः ॥ १९

अतो जले स्थले दुर्गे सर्वत्र सङ्कटे भये ।
धर्म एकः सहायोऽत्र सह गामि नृणां मृतौ ॥ २०

मत्वेति धीधनैर्नित्यं स एव धर्म ऊर्जितः ।
सर्वत्रापदि सद्धन्धुः कार्योपायादि रक्षकः ॥ २१

निर्विघ्नेन ततःपुण्याद्धिनायासेन पुण्यधीः ।
पुर्यां बहिर्महीभागं मत्वेति हृदि चिन्तयेत् ॥ २२

आदौ प्राक्च्छुभपाकेन मृत्योरुद्धरितो ऽस्म्यहम् ।
यदि तर्हि न मे योग्यं गमनं तद्गृहे क्वचित् ॥ २३

यतोऽत्र रिपवो बाह्याः शक्यन्ते त्यक्तुमञ्जसा ।
दुष्टारिपुस[1]मापन्ना अन्तस्था न च बान्धवाः ॥ २४

निराकर्तुमशक्याश्च कषायाश्च परिग्रहाः ।
अभ्यन्तरारयो यद्धत्तद्धत्ते भ्रातरः खलाः ॥ २५

विचिन्त्येति कुमारोऽसौ विवेकोज्वलमानसः ।
ततश्चचाल यत्नेन प्रतिदेशान्तरं शनैः ॥ २६

गच्छन्मार्गे स एकस्मिन्क्षेत्रे वीक्ष्य कृषीवलम् ।
खेटयन्तं हलं धीमानिति चिन्तां चकार च ॥ २७

अहो मया बहून्यत्राभ्यास्तान्निजलीलया ।
विज्ञानानि पराणीदमपूर्वं दृश्यतेतराम् ॥ २८

विचिन्त्येति स धन्यात्मा गत्वा तन्निकटं गुणी ।
कौतुकेन तमन्यार्थ(मास्ये)[2] विलोकयन् स्थितः ॥ २९

तद्रूपातिशयं वीक्ष्य समासाद्याति विस्मयम् ।
नेपथ्यभूषितं कान्तं तं प्रत्याहेति पामरः ॥ ३०

---

1. त्व - A, 2 - A

भो प्रभो शुद्ध एवाहं कुटुम्बी घादि वर्जितः ।
दध्योदनं मयानीतं भुङ्क्ष्व त्वं मदनुग्रहात् ॥ ३१

इमां[1] मत्प्रार्थनां दक्ष सफलां कुरु भोजनात् ।
तदा (कण्यीवदद्)[2] धन्यएवमस्त्विति तं प्रति ॥ ३२

[3]ततस्तुष्टः कुटुम्बीह्युपवेश्य हलसन्निधौ ।
तं पत्रपात्रिकार्थं पत्राण्यानीतुं ययौ द्रुतम् ॥ ३३

गते तस्मिन्कुमारोऽसौ मुष्ट्या धृत्वा हलं ततः ।
कौतुकेन बलीवर्दौ खेटयेत्स्वेच्छया मुदा ॥ ३४

तदा हलमुखेनाशु भूमेरीषद्विदारणे ।
सति स्वर्णभृतस्ताम्रकलशो निर्गतो महान् ॥ ३५

तं दृष्ट्वाहेति वाक्यं सोऽहो मेत्र पूर्यतेतराम् ।
विज्ञानाभ्यासयोगेनानेन द्रव्यादि दर्शनात् ॥ ३६

कुटुम्बी यद्ययं दैवात् पश्येदेतद्धनं महत् ।
अनर्थं तर्हि मे कुर्याद्भ्रातृवद् स्फुटमञ्जसा ॥ ३७

मत्वेति द्रव्यभीतोऽसौ तं तथैव विधाय च ।
तत्र मृत्तिकया जल्पीभावं कृत्वा ह्युपाविशत् ॥ ३८

पत्राण्यानीयगर्तस्थं सन्नीरकलशं शुभम् ।
दध्योदनं च पाणिभ्यां आकृष्य तत्पदाम्बुजौ ॥ ३९

प्रक्षाल्य तानि पत्राणि तेषु पात्रीकृतेषु च ।
तस्य भोक्तुं कुमारं ह्युपावेश्यत्स पामरः ॥ ४०

---

1 मे त्वं - A 2 - A 3. पत्न्यः - A

ततो भुक्त्वा तदन्नं सधन्यःपृष्ट्वा कुटुम्बिनः ।
सुराजगृहसन्मार्गं ययौ तेन पथेच्छया ॥ ४१

कर्षन् कृषीवलस्तत्र वीक्ष्य तद्द्रव्यमूर्जितम् ।
परं विस्मयमासाद्य कुर्यादित्थं विचारणम् ॥ ४२

अहो पुण्यात्मनस्तस्य पुण्यपाकेन निर्गतम् ।
इदं द्रव्यं महन्मे नोचितं गृहीतुमञ्जसा ॥ ४३

यतो येऽन्यधनं लोभान्मूढा गृह्णन्ति तेऽधमाः ।
प्राप्य स्वश्रीविनाशं स्युर्दरिद्रिणो भवे भवे ॥ ४४

विचिन्त्येति सनिर्लोभः समर्पणार्थमात्मवान् ।
धनस्य तस्य तत्पृष्ठे लग्नो व्रजेद्द्रुतं ततः ॥ ४५

आगच्छन्तं कुमारस्तं दूरस्थं शब्दकारिणम् ।
वीक्ष्य तरोरधोभागे स्वसुखेन ह्युपाविशत् ॥ ४६

आगत्य पामरो नत्वेह्यात्मजमब्रवीदिदम् ।
विहाय स्वधनं नाथ किमागतोसि निस्पृहः ॥ ४७

ततो वैश्यमुवाचेति भद्रद्रव्येण संयुतः ।
आगतः किमहं तत्र किन्तु दध्योदनं परम् ॥ ४८

त्वया दत्तं मया भुक्तं मे जा(तं तद्धनं क)[1]थम् ।
ततोऽतिनिस्पृहो दक्षः पामरोऽब्रूत सद्वचः ॥ ४९

कुमार श्रृणु मद्वाक्यमेतत् क्षेत्रं पुरामुहुः ।
पितामहः पिता मे चाकर्षत्पुत्रैर्निजैस्समम् ॥ ५०

आकर्षमहामप्यत्र कदाचित्तन्न निर्गतम् ।
आगते त्वयि तद्द्रव्यं त्वत्पुण्यादद्य निर्गतम् ॥ ५१

अमुना हेतुना नूनं त्वदीयं तद्धनं भवेत् ।
वात्र नो मन्दभाग्यानां ईदृश्यस्सम्पदः कुतः ॥ ५२

ततोऽरुणत्कुमारोऽसौ मदीयं तद्धनं मया ।
तुभ्यं दत्तं हि भुङ्क्ष्व त्वं यत्नेन पुण्यशर्मसु ॥ ५३

ततो महाप्रसादोऽयं भणित्वेति स पामरः ।
पुनः प्रणम्य मूर्ध्ना तं बभाषे सद्भिरेति भो ॥ ५४

नाथैतन्नाम्नि सद्ग्रामेऽत्रैतन्नामाप्यहं वसन् ।
कुटुम्बी मम सादृश्यं किञ्चिद्यत्ते प्रयोजनम् ॥ ५५

यदा तदा त्वया शीघ्रं ज्ञापनीयं तदञ्जसा ।
विज्ञाप्येति मुहुर्नत्वा तं स व्याघुटितस्ततः ॥ ५६

अग्रे गच्छन् स एकाकी ददर्श प्राक्च्छुभोदयात् ।
एकस्मिन्प्रासुके रम्ये प्रदेशे संस्थितं मुनिम् ॥ ५७

अवधिज्ञानसम्पन्नं शश्वद्धर्मोपदेशकम् ।
त्रिजगद्धितकर्तारं महान्तं गुणसागरम् ॥ ५८

ततस्तद्वीक्षणादाप्य स्वानन्दं कुमरो हृदि ।
अभ्येत्य तं महात्मानं त्रिः परीत्य कृताञ्जलिः ॥ ५९

प्रणम्य शिरसा भक्त्या तत्पादाब्जौ सुरार्चितौ ।
उपविश्य स्वधर्माय तदङ्घ्रिनिकटे मुदा ॥ ६०

मुनीन्द्रो धर्मवृद्धाख्यं महाशीर्वाददानतः ।
अभिनन्द्य तमत्यर्थं बभाषे धर्ममित्यहो ॥ ६१

कुमारो येन धर्मेण निधानं ते पदे पदे ।
जायते चोर्जितो लाभस्सर्वत्र मान्यता परा ॥ ६२

स सद्धर्मस्त्वया कार्य इहामुत्र हितङ्करः ।
(स्वर्णान्मु)[1] क्तिसुखाधारो जिनचक्रीन्द्र भूतिदः ॥ ६३

यतो धर्मेण जायन्ते त्रिजगच्छ्री सुखादयः ।
चत्वारः पुरुषार्थाश्च धर्मिणां सत्पदान्यहो ॥ ६४

(सद्धर्मोऽ)[2]त्र द्विधा प्रोक्तो मुनीनां गृहीणां जिनैः ।
सम्पूर्णे मुनिधर्मोऽल्पो गृही धर्मो दयामयः ॥ ६५

महता मुनिधर्मेण साक्षान्मोक्षोऽत्र लभ्यते ।
अनन्तसुखसम्पन्नो नित्यो धीरैर्मुनीश्वरैः ॥ ६६

सर्वार्थसिद्धिपर्यन्तं वा भुक्त्वा सुखमुल्बणम् ।
सर्वज्ञवैभवश्चाप्य वा चक्री पदमूर्जितम् ॥ ६७

चरमाङ्गत्वमासाद्य योग्यं सत्तपसा परम् ।
क्रमेण यान्ति निर्वाणं यतिधर्मेण योगिनः ॥ ६८

स्वर्गमच्युतपर्यन्तं [3]विशुद्धिकुलमन्दिरम् ।
लब्ध्वानुसत्कुलं पूज्यं सद्राज्यं सम्पदाकरम् ॥ ६९

भुक्त्वा भोगांश्च शर्माब्धींस्ततो हित्वा क्रमाद्बुधाः ।
कर्माणि तपसा यान्ति गृही धर्मेण निर्वृतिम् ॥ ७०

द्वयोरस्सद्धर्मयोर्मूलं सम्यक्त्वं शशिनिर्मलम् ।
निश्शङ्कादिगुणैर्युक्तं शङ्कादि दोषवर्जितम् ॥ ७१

---

1. & 2 - A   3. विश्वर्धि - A

जिनशक्रादि सम्भूतेः कारणं सत्सुखाकरम् ।
सहगामि सुदृग्भाजां विद्धि दक्षत्वमूर्जितम् ॥ ७२

वीतरागात्परोदेवो भुक्तिमुक्तिनिबन्धनः ।
महान्नास्तिजगत्पूज्यो न भूतो न भविष्यति ॥ ७३

अहिंसा लक्षणाद्धर्माज्जिनेन्द्रोक्ताच्च जातुचित् ।
स धर्मो नापरः सत्यो विश्वर्द्धि सुखकारणः ॥ ७४

समस्तसङ्गनिर्मुक्ता निर्गन्धात्सद्गुरोर्महान् ।
नान्यो गुरुः सतां मान्यः मोक्षमार्गोपदेशकः ॥ ७५

तत्वेभ्यः [1]सर्वभेदेभ्यः सर्वज्ञोक्तेभ्यः ऊर्जितम् ।
तत्वं नात्र परं सत्यं सम्यक्त्वज्ञानकारणम् ॥ ७६

सत्पात्रदानतो नान्यद्दानं भोगसुखप्रदम् ।
द्धादशेभ्यस्तपोभ्योऽन्यं न तपः कर्मनाशनम् ॥ ७७

इत्यादि जिनसूत्रे यो निश्चयः क्रियते बुधैः ।
श्रद्धा रुचिश्च तत्सर्वं बीजं दृक्कल्पशाखिनः ॥ ७८

यतः सम्यक्त्वमेवात्र समीहितसुखप्रदम् ।
त्रिजगत्पतिभूतानां कारणं च जिनश्रियः ॥ ७९

ज्ञात्वेति दृग्विशुद्धिं त्वं विधेह्यष्टगुणान्विताम् ।
चन्द्रज्योत्स्नानिभां त्यक्त्वा तन्मलां पञ्चविंशतिम् ॥ ८०

तथा देवार्चनादीनि षट् कर्माणि त्व(माचर)[2] ।
नित्यं निगद्यमानानि मयेमानि वृषाप्तये ॥ ८१

---

1. सप्त – A 2 – A

जिनपूजागुरूपास्तिः स्वाध्यायस्सम्यमस्तपः ।
दानं नित्यं गृहस्थानां षट्कर्माणि दिने दिने ॥ ८२

कारयित्वा जिनागारं जिनमूर्तींश्च भक्तितः ।
स्वशक्त्याष्टविधैः पूजा द्रव्यैस्सारैर्मनोहरैः ॥ ८३

पूज्यन्ते प्रत्यहं यस्यां जिनेन्द्रप्रतिमा बुधैः ।
देवपूजा मता सात्र विश्वाभ्युदयकारिणी ॥ ८४

जिनेन्द्रपूजया यस्माल्लभ्यन्ते सर्वसम्पदः ।
विघ्नजालानि नश्यन्ति गृहारम्भा शुभानि च ॥ ८५

प्रत्यहं पात्रभूतानां गुरूणां सद्गुणोत्करैः ।
सेवा भक्तिश्च शुश्रूषा सर्वदाज्ञा विधीयते ॥ ८६

ग्रहस्थैर्या स्वधर्माय सा गुरूपास्तिरुच्यते ।
अज्ञानमोहहन्त्री च दृग्ज्ञानचरणप्रदा ॥ ८७

पठनं क्रियते दक्षैः सिद्धान्तस्य शिवाप्तये ।
सामायिकनमस्कारजपादि यच्च निर्मलम् ॥ ८८

ज्ञानाभ्यासः समस्तस्स स्वाध्यायो विश्वदीपकः ।
मोहाज्ञानतमोहन्ता स्यात् पञ्चाक्षारिघातकः ॥ ८९

यतो ज्ञानेन जानन्ति हेया देयं शुभाशुभम् ।
देवशास्त्रगुरूणाञ्च परीक्षां धर्मलक्षणाम् ॥ ९०

मुक्तेर्मार्गं कुमार्गं च सत्यासत्यमताञ्जनाः ।
ज्ञानहीना न किञ्चिच्च जात्यन्धा इव हस्तिनम् ॥ ९१

विदित्वेति सदा दक्षैः कार्यं स्वाध्याय ऊर्जितः ।
सिद्धान्तेऽज्ञाननाशाय ज्ञानाय शिवशर्मणे ॥ ९२

सद्व्द्वादशीव्रतादीनां पालनं यद्विधीयते ।
निग्रहं पञ्चखादीनां हृदिश्चाङ्गिदयादिकम् ॥ ९३

स सर्वसंयमः प्रोक्तो गृहिणां श्रीगणाधिपैः ।
पुण्यागमकरोऽन्नित्यं पापाश्रवनिरोधकः ॥ ९४

अष्टम्यां च चतुर्दश्यां वान्यत्तपो व्रतादिषु ।
नियमेनोपवासश्च कायक्लेशोऽथवा परः ॥ ९५

आचर्य ते सदा धीरैद्विषट्भेदैस्तपोव्रजैः ।
कर्मारिण्याग्निसादृश्यं तत्कृत्स्नं प्रोदितं तपः ॥ ९६

तपसा गृहिणां नित्यं गृहारम्भादिजा शुभम् ।
क्षीयते वर्धते धर्मः कल्पसाक्षिगुणै (स्समम्)[1] ॥ ९७

मत्वेति पर्वतिथ्यादौ कर्तव्यं निर्मलं तपः ।
उपवासादिभिर्दक्षैः त्याज्यं प्राणात्ययेऽपि न ॥ ९८

प्रत्यहं स्वगृहद्वारं दानाय वीक्ष्यतेऽत्र यत् ।
दानं वा दीयते साक्षात् प्राप्यं पात्रं सुखाकरम् ॥ ९९

स्वान्ययोर्हितकृत्सर्वं तद्दानं धर्मशर्मदम् ।
गृही पापहरं भोगभूमि सम्पत्करं भवेत् ॥ १००

एते षट्कर्मभिर्नित्यं जायते धर्म उत्तमः ।
गृहस्थानां च हीयन्ते पापकर्मग्रहोद्भवम् ॥ १०१

विज्ञायेति कुमार त्वं सदाचर शिवाप्तये ।
षट्कर्माणि प्रयत्नेन स्वर्गदानि शुभानि च ॥ १०२

---

1 - A

तथाणुगुणशिक्षाख्यैः व्रतैर्द्वादशभिश्शुभैः ।
गृहिणां ज्ञायते धर्मोऽशुभघ्नस्वर्गकारकः ॥ १०३

धर्मसिध्यै कुमार त्वं गृहाण शिवशर्मणे ।
श्रावकव्रतसाराणि धर्मशर्मकराणि च ॥ १०४

सद्धर्मक्रियते त्वया गुणानिधिर्धर्मं श्रय प्रत्यहं
धर्मेणाचर सत्पथं जिनमते धर्माय नित्यं नमः ।
धर्मात्तेनिखिलार्थसिद्धिरनघा धर्मस्य मूलं भज
धर्मे तिष्ठ शिवाय नित्यमतुलो धर्मोऽवतात्ते भवात् ॥ १०५

धर्मोऽनन्त सुखार्णवोऽसुखहरो धर्मं बुधाःकुर्वते
धर्मेणाशु समाप्यते गुणगणो धर्माय मूर्ध्ना नमः ।
धर्मान्नास्त्यपरः शिवार्थजनको धर्मस्यमूलं क्षमा
धर्मे चित्तमहं दधा(दा)मि भवतो मां पाहि[1] धर्मोऽद्भुतः ॥१०६

इति श्रीभट्टारकसकलकीर्तिविरचितेधन्यकुमारचरित्रे
विघ्नशान्तिधर्मश्रवणो नाम
द्वितीयोऽधिकारः

॥ श्रीरस्तु ॥

*****

****

1. पातु - A

।। अथ तृतीयोऽधिकारः ।।

विश्वविघ्नहरान्वन्दे पञ्चसत्परमेष्ठिनः ।
विश्वश्रीर्धर्मकर्तृंश्च विश्वबन्धून् गुणार्णवान् ।। १

धन्योऽथ तद्भवचो धर्मश्रवणेनाप्य सन्मुदम् ।
प्रणम्य शिरसा भक्त्या मुनीन्द्रं त्रिजगद्धितम् ।। २

स्वयोग्यव्रतसाराणि गृहीत्वा श्रद्धया समम् ।
सम्यग्दृष्टिर्महादक्षः पप्रच्छेऽतिकृताञ्जलिः ।। ३

भगवन् हेतुना केन द्विषन्ति भ्रातरोऽखिलाः ।
माता स्निह्यति मेऽत्यर्थं केन पुण्योदयेन च ।। ४

पदे पदे निधानानि जायन्ते सम्पदोद्धृताः ।
एतत्सर्वं कृपानाथ मद्दयायै निरूपय ।। ५

तदाकर्ण्य मुनीन्द्रोऽसौ तदनुग्रहहेतवे ।
उवाच दिव्यवाण्येति प्राक्कृतां तद्भवावलीम् ।। ६

कुमारं स्ववशे कृत्वा चित्तं श्रृणु दिशाम्यहम् ।
संवेगधर्मकर्तृणि पूर्वजन्मान्तराणि ते ।। ७

एषां श्रवणमात्रेण पापाद्भीतिः प्रजायते ।
दानव्रतनमस्कारादिषु सद्भावना नृणाम् ।। ८

इहैव भारतक्षेत्रे देशो मगधसंज्ञके ।
रम्ये भोगवती ग्रामे भवेद्ग्रामपतिश्शुभात् ।। ९

कामवृष्ट्याह्वयस्तस्य मृष्टदानाभिधाऽभवत् ।
भार्या तयोर्गृहेह्यासीद्गृहादिकर्मकारकः ।। १०

भृत्यः सुकृतपुण्याख्यस्तद्गर्भं सङ्क्रमे सति ।
तस्या हि मृष्टदानायाः कामवृष्टिर्मृतोऽशुभात् ॥ ११

निन्द्यो पुत्रः यथा गर्भो वर्धतेऽस्यास्तथा तथा ।
गोत्रजाः स्वजनास्सर्वे ये केचिच्च प्रयोजकाः ॥ १२

तन्महापापपाकेन मृतास्ते निखिला जनाः ।
मातुर्माताऽगमन्मृत्युं तत्प्रसूतेरनन्तरम् ॥ १३

धनधान्यानि वस्तूनि क्षयं जग्मुःशुभानि च ।
अभूत्सुकृतपुण्यस्स तदा ग्रामपतिश्शुभात् ॥ १४

कुपुत्रजन्मपापेनऽऽहो प्रणश्यन्ति सज्जनाः ।
लक्ष्मीसुखश्सुभाद्याश्च दारिद्र्यं ढौकते नृणाम् ॥ १५

वात्रोत्पत्ति र्भवेत्पुत्रं[1] धनस्वजननाशिनी ।
गोत्रक्षयङ्करी सूनोः पापिनः पापपाकतः ॥ १६

वाऽऽनिष्ठं पुत्र भार्यादि यत्किञ्चिज्जायते नृणाम् ।
फलं पापस्य तत्सर्वं विद्धि त्वं दुःखकारणम् ॥ १७

मत्वेत्यनिष्टसंयोगमूलं प्राणान्त्य(त्य)ये क्वचित् ।
कर्तव्यं न मनाक्पापं विहाय धर्ममूर्जितम् ॥ १८

अहो पूर्वभवेऽनेन बालकेनाशुभाद्दते ।
किञ्चित्पुण्यं कृतं नात्र धनशर्मादिकारणम् ॥ १९

ततोऽस्येयमवस्थाभून्निन्द्या मत्वेति सा व्यधात् ।
मृष्टदाना स्वपुत्रस्याकृतपुण्याभिधं शुचा ॥ २०

---

1 पुंसां - A

कृत्स्नाद्धनक्षयान्माता कुर्वन्ती प्रेषणं सदा ।
परगेहेऽतिकष्टेन पालयेत्तं शुभादिगम् ॥ २१

तस्मिन्नवसरे नत्वा कुमारो धन्यपूर्वकः ।
अवधिज्ञानिनं दक्षमप्राक्षीदिति योगिनम् ॥ २२

भगवन्प्राग्भवेऽनेन कृतं पापं हि कीदृशम् ।
कीदृशैः स्वदुराचारैः येनैषोऽभूत्तथाविधः ॥ २३

ततो यतिरुवाचेति पापभीतिप्रदां कथाम् ।
अत्रैव नगरे पुण्याकरे भूतिलकाह्वये ॥ २४

महाधनेश्वरो वैश्यो जैनो धनपतिर्भवेत् ।
पुण्यकर्माग्रिणीः धीमान्महादाता व्रती गुणी ॥ २५

अन्यदा स सुधीश्चित्ते चिन्तयेदिति निर्मले ।
अहो याः पुण्यपाकेन जायन्ते प्रचुरश्रियः ॥ २६

तासां फलमहं मन्ये पात्रदानं हि केवलम् ।
सत्पात्रजा तु गृह्णन्ति किञ्चिन्नाहारतोऽपरम् ॥ २७

वा निर्ग्रन्थमुनीन्द्रेभ्यो दातुं योग्यं न जातुचित् ।
नैर्ग्रन्थ्यहानिकृन्निन्द्यं धनवस्त्रादिकं मनाक् ॥ २८

अतो जिनालयास्तुङ्गाः काराप्यन्तेप्यनेकशः ।
तन्मूर्तयः प्रतिष्ठाश्च धनिभिर्बहुसम्पदा ॥ २९

सत्पुण्यकर्मभिश्चैतैर्भवन्ति सफलाश्श्रियः ।
कल्पवल्ल्य इवानर्घ्या विश्वे हितफलप्रदाः ॥ ३०

यतश्चैत्यालये किञ्चिदार्जयन्ति शुभं महत् ।
महत्या पूजया केचिन्नमस्कारेण भद्रकाः ॥ ३१

स्तवनेनापरे दक्षा अन्येऽहो वीक्षणेन च ।
गीतगानैश्च नृत्याद्यैः केचिद्वादित्रवादनैः ॥ ३२

केचिन्महाभिषेकं च कृत्वाऽऽश्रयन्ति सद्वृषम् ।
धर्मोपकरणादीनि केचिद्दत्वा जिनालये ॥ ३३

केचिदुद्यापनादीनि धनिनो ढौकयन्ति च ।
जिनेन्द्रमन्दिरे चान्ये यात्रां कुर्यात्महोत्सवम् ॥ ३४

तत्र तिष्ठन्ति योगीन्द्रास्तैः सद्धर्मः प्रवर्तते ।
धर्मेण स्वर्गमोक्षादि लभन्ते धार्मिका ध्रुवम् ॥ ३५

इत्याद्यैर्विविधाचारैः शुभैश्श्रीमज्जिनालये ।
आर्जयन्ति सदा पुण्यं परमं गृहनायकाः ॥ ३६

तस्मात्सद्धनिनां नान्यत्सम्पदां प्रवरं फलम् ।
महत्पुण्यं समं चैत्यालयोद्धारेण जातु च ॥ ३७

वर्षादि कोटिपर्यन्तं पूज्यन्ते यास्सदा बुधैः ।
जिनेन्द्रप्रतिमास्तीर्थकृदातिपुण्यमातरः ॥ ३८

तासां कारायका(रयिता)दीनां यत्पुण्यं प्रवरं भवेत् ।
प्रत्यहं तस्य को वेत्ति प्रमाणाम्बुधसत्तमः ॥ ३९

अतः श्रीजिनबिम्बानां करणेन धनाधिपैः ।
लभ्यते परमश्रेयः स्वर्मुक्तिश्रीगृहाङ्गणम् ॥ ४०

तीर्थेशप्रतिमानां ये कारयन्ति शिवासये ।
प्रतिष्ठां धनिनस्तेषां पुण्यसङ्ख्यां न वेद्म्यहम् ॥ ४१

यतः प्रतिष्ठया नित्यं वर्धते धर्म उत्तमः ।
आर्जयन्ति परं पुण्यं भव्यां बिम्बादि कारकाः ॥ ४२

केचिन्मिथ्यादृशो मूर्ती कारयित्वाऽर्हतां मुदा ।
प्रतिष्ठाप्य प्रतिष्ठायां जैना भवन्ति नान्यथा ॥ ४३

इत्यादि प्रवरं पुण्यं चैत्यचैत्या(लया)[1]त्मनाम् ।
ज्ञात्वा शक्त्या जिनार्चादीन् कारयन्तु धनान्विताः ॥ ४४

विचिन्त्येति महाश्रेष्ठी स प्रोत्तुङ्गं जिनालयम् ।
उत्तुङ्गतोरणोपेतं ध्वजमालाद्यलङ्कृतम् ॥ ४५

विशिष्टमतिरम्यं महातेजो व्याप्तदिङ्मुखम् ।
अकारयत् स्फुटद्दीप्रं बहुसद्द्रव्यकोटिभिः ॥ ४६

हेमरत्नमयीर्बह्वीस्तेजोमूर्तिरिवाद्भुताः ।
उन्नता जिनदेवानां प्रतिमाः पुण्यलक्षणाः ॥ ४७

महापुण्यखनीस्साराः विशिष्टः पुण्यसिद्धये ।
कारयामास वैश्योऽसौ दीप्रा नेत्रप्रियाश्शुभाः ॥ ४८

तासां चतुर्विधान् सङ्घानाहूय बहुभूतिभिः ।
यज्ञोक्तविधिना दक्षः सत्प्रतिष्ठामकारयत् ॥ ४९

स्वर्णरत्नमयान्येव बहूनि द्रव्यकोटिभिः ।
भृङ्गारकलशादीनि धर्मोपकरणानि च ॥ ५०.

धर्मकर्मकराण्येष नित्यं श्रीधर्मसिद्धये ।
अकारयद्धनी प्रीत्या त्वत्र चैत्यालये शुभे ॥ ५१

तद्रत्नप्रतिमादीनामाकर्ण्य ख्यातिमूर्जितम् ।
कश्चिद्दुर्व्यसनी चौरो लोभमाप्येति चिन्तयेत् ॥ ५२

---

1 - A

अहो तस्मिन् जिनागारे बहुरक्षायुते क्वचित् ।
यतिवेषाद्दतेनैव प्रवेशो लभ्यते मया ॥ ५३

विचिन्त्येति स मायावी लोभासक्तमानसः ।
भूत्वाऽऽशु ब्रह्मचारी च कुर्वन्क्षोभं परं महत् ॥ ५४

मायया देशमध्येऽति कायक्लशादिभिर्वदन् ।
लोकाग्रस्वगुणान्प्राप्तः क्रमाद्भूतिलकं पुरम् ॥ ५५

श्रुत्वा तत्ख्यातिमत्यर्थं श्रेष्ठीधनपतिर्द्रुतम् ।
सम्भ्रमेणैव नत्वा तमानयत्स्व जिनालयम् ॥ ५६

मायावी सोऽतिपापात्मा मायया रञ्जयन्जनान् ।
कायक्लेशेन तत्रास्थाच्चैत्रा॑गारे बकोपमः ॥ ५७

अन्यदा वणिजां नाथो महाग्रहेण मायया ।
अनिच्छन्तं दुरात्मानं कृत्वा ज्ञात्वाऽशुभाशयम् ॥ ५८

जिनालयस्य रत्नोपकरणादि सुरक्षकम् ।
तं नतो बहुलक्ष्म्याप्त्यै ययौ द्वीपान्तरं शुभम् ॥ ५९

इतरस्सव्यसनी पापी द्यूतादि व्यसनव्रजैः ।
सर्वानभक्षयत्सत् (सोऽपि) धर्मोपकरणादिकान् ॥ ६०

जिनमूर्तिविलोपोत्थमहापापोदयेन च ।
महाकुष्ठादयो रोगादुस्सहायेऽतिदुःखदाः ॥ ६१

ते सर्वे पापिनस्तस्य सर्वाङ्गेऽतिघृणास्पदे ।
प्रादुर्बभूवुरत्यर्थं विश्वदुःखनिबन्धनाः ॥ ६२

अहो उत्कृष्टपापस्य वा पुण्यस्य भवेत्फलम् ।
अतीव कटुकं पुंसां मधुरं वाऽशुभं शुभम् ६३

अत्रैव वधरोगाद्यैः ख्याति पूजादिकैः परैः ।
अमुत्र श्वभ्रगत्यादौ किंपृष्टव्यं च सद्गतैः ॥ ६४

जिनसिद्धान्तसूरीणां पूजया यान्ति सज्जनाः ।
स्वर्गश्च दुर्जनाः श्वभ्रं नूनं निर्माल्य भक्षकाः ॥ ६५

निर्माल्यभक्षणेनाहो कुलनाशं धनक्षयम् ।
शठारोगव्रजं चाप्य नरकं यान्ति सप्तमम् ॥ ६६

वरं हालाहलं भुक्तं सकृत्प्राणहरं नृणाम् ।
अनन्तभवदं निन्द्यं न च निर्माल्यभक्षणम् ॥ ६७

विज्ञायेति क्वचिद्दक्षैस्तीर्थकृच्छास्त्रयोगिनाम् ।
फलमात्रादि न ग्राह्यं पूजाद्रव्यं विषादिवत् ॥ ६८

तत्रैव समहाकुष्ठगलिताखिल देहभाक् ।
बीभत्सो दुष्टधीयावदास्ते दुःखाब्धिमध्यगः ॥ ६९

रौद्रो रौद्राशयः पापी रौद्रध्यानपरायणः ।
निर्विघ्नेन महा श्रेष्ठी तावदाऽऽयात एव सः ॥ ७०

श्रेष्ठिनं तं विलोक्यायमागतोऽत्र मृतो न किम् ।
तस्योपरि महारौद्रध्यानेनेति स रौद्रधीः ॥ ७१

तीव्रवेदनयाक्रान्तो दुर्व्याध्यग्निकरालितः ।
मृतिं महातिकष्टेन जगामान्यसमाधिना ॥ ७२

ततो देवबहुद्रव्यभक्षणाघातिभारतः ।
पपात सोऽतिपापात्मा सप्तमे नरकार्णवे ॥ ७३

बीभत्सेऽतीव दुर्गन्धे विश्वदुःखनिबन्धने ।
उपपाद प्रदेशे स ऊर्ध्वपादोऽप्यधोमुखः ॥ ७४

वपुर्हुण्डकसंस्थानं सम्पूर्णमतिकुत्सितम् ।
सम्प्राप्यैकमुहूर्तेन पपाताधो महीतले ॥ ७५

उत्पत्यैषधरा पृष्टाच्छतयोजनपञ्चकम् ।
अपतत्सहसा घाताच्छतचूर्णीकृताङ्गभाक् ॥ ७६

पतितोऽतीव बीभत्से नरके तत्र दुस्सहे ।
लोडत्यसौ महादुःखी वृक्षाग्राच्युतपत्रवत् ॥ ७७

सहस्रवृश्चिकस्पर्शसन्दष्ठाधिकवेदने ।
दुस्पर्शे शीतबाहुल्ये वज्रकण्टकसङ्कुले ॥ ७८

ततस्तान्नारकान् रौद्रान् रौद्ररूपान्भयानकान् ।
रक्तनेत्रान्शठान्रौद्रकर्मणो रौद्रमानसान् ॥ ७९

विश्वदुःखाकरीभूतं दुस्पर्शञ्च भयास्पदम् ।
दुष्प्रेक्ष्यं वीक्ष्य तत्क्षेत्रं सदीन इति चिन्तयेत् ॥ ८०

कोऽहं कस्मादिहायातो वाऽऽनीतः केन कर्मणा ।
किमिदं दुस्पर्शं क्षेत्रं केऽमी रौद्राश्च नारकाः ॥ ८१

इत्यादि चिन्त्यमानस्य तस्य दीनात्मनस्तदा ।
विभङ्गावधिज्ञानञ्च प्रादुरासीद्द्विरूपकम् ॥ ८२

तेनात्मानं स्फुटं ज्ञात्वा पतितं नरकेऽन्ति मे ।
प्राग्जन्मनिन्द्यकर्माणि चिन्तयेदिति सोऽघभाक् ॥ ८३

पञ्चाक्षविषया शक्त्या सतैव व्यसनान्यहो ।
सेवितानि मया मूढचेतसा पापिना मया ॥ ८४

मधुमांसाद्यखाद्यानि खादितानि शठात्मना ।
सुरपानाद्यपेयानि पीतानि स्वेच्छयानिशम् ॥ ८५

चौर्यकूटप्रयोगाद्यैः परद्रव्यादयो हताः ।
सेविताः पररामाद्या हताश्च जीवराशयः ॥ ८६

असत्यकटुकादीनि मया ब्रूतान्यनेकशः ।
देवोपकरणादीनि भक्षितानि च मायया ॥ ८७

आर्तरौद्रादि दुर्लेश्याद्यैःकृतं दुष्टचेष्टया ।
परपीडादि कर्मौघैरकृत्यं विश्वनिन्दितम् ॥ ८८

इत्याद्यन्यैः दुराचारैः केवलं पापमार्जितम् ।
विषयान्धहृदा नित्यं मया पूर्वभवे महत् ॥ ८९

तेनातिपापपाकेन महती वेदनात्र मे ।
दुरन्ता दुस्सहा जाता त्यक्तोपमसुखातिगा ॥ ९०

किञ्चिन्मनाग्वृतं नाहो पालितं प्राग्भवे मया ।
जपिता न नमस्कारा न कृतं जिनपूजनम् ॥ ९१

सेविता गुरुपादा न नाक्षाणां निग्रहः कृतः ।
दत्तं न सत्पात्रदानं न कृतं ध्यानमुत्तमम् ॥ ९२

इत्याद्यन्यैश्शुभाचारैः स्वल्पोऽपि न कृतो मया ।
धर्मस्सद्गतिशर्मादिहेतुः दुर्गतिवारकः ॥ ९३

ततो धर्माद्दते मेऽत्र जातं जन्मातिदुष्करम् ।
दुरन्तं दुस्सहं निन्द्यं महादुःखाब्धिमध्यगम् ॥ ९४

अतः पापारिणा ग्रस्तः क्वाहं यामि ? करोमि किम् ?
कश्चिन्मे न शरण्योऽत्र त्राता वा कर्मपाकतः ॥ ९५

इदं दुःखार्णवं घोरमुत्तरिष्याम्यहं कथम् ? ।
महती वेदना क्षिप्ता दैवेन मूर्ध(नि) परा ॥ ९६

इत्यादि प्राकृता श्रेया पश्चात्तापादिपावकैः ।
अन्तर्बाह्यविदग्धस्य दीनस्य तस्य दुर्विधेः ॥ ९७

आपादमूर्ध्वपर्यन्तमङ्गास्थिपञ्जरं क्रुधा ।
मुद्गरादि प्रहारोघैश्चूर्णयन्त्येत्य नारकाः ॥ ९८

चक्रुर्विकारसञ्जातपापपाकेन तस्य भोः ।
निर्दयाः केचिदागत्यात्रोत्पाटयति चक्षुषी ॥ ९९

हृदयोत्थाघपाकेनापरे दुःखाय दुर्धियः ।
विदार्यास्योदरं तस्मात्त्रोटयन्त्यत्र मालिकाम् ॥ १००

अन्येऽतिनिर्घृणाः क्रूराः द्विखण्डं क्रकचेन च ।
आमस्तकाङ्घ्रिपर्यन्तं तस्याङ्गं कुर्वतेऽखिलम् ॥ १०१

अन्येतिपापिनाः शस्त्रैर्वपुषोऽस्याखिलस्य भोः ।
तिलोपमानि खण्डानि कुर्वन्ति वेदनाप्तये ॥ १०२

तदङ्गकृतखण्डास्ते पारका इव तत्क्षणम् ।
सम्बन्धं यान्त्यतो नास्ति मृत्युरायुःक्षयादृते ॥ १०३

इत्यादि वेदनाक्रान्तं तमुक्षिप्या सुखाप्तये ।
तप्ततैलकटाहेऽन्ये क्षिपन्प्रज्वलितेतराम् ॥ १०४

ततोऽतिदग्धसर्वाङ्गो वैतरण्या जले शुभे ।
गत्वातिक्षारदुर्गन्धे [1]निमज्जेद्दाहशान्तये ॥ १०५

---

1 सोऽमज्जद् - A

तत्रातितप्तरक्ताम्बुमांसाम्भःकर्दमादिभिः ।
सन्तापितस्तरां शान्त्यै सोऽसिपत्रवनं ययौ ॥ १०६

तत्रासीनस्य तस्याङ्गं शतखण्डमभूत्तराम् ।
दुर्वाताद्गलितैः पत्रैर्वृक्षेभ्यः खड्गसन्निभैः ॥ १०७

ततोऽतिखण्डिताङ्गोऽसौ गत्वा तच्छ्रमहानये ।
गलद्रक्तोऽतिबीभत्सः प्राविशत्पर्वतान्तरम् ॥ १०८

पक्षिव्याघ्रादि रूपाद्यैर्विक्रियोऽर्थैर्भयानकैः ।
तत्रापि खादितुं दीनं प्रारेभे ते[1] च नारकाः ॥ १०९

परस्त्रीसङ्गपाकेन तप्तलोहाङ्गनां बलात् ।
तद्गले योजयन्त्यन्ये जलज्वालोपमां मुहुः ॥ ११०

सद्दंशेन विदार्योच्चैर्वदनं तस्य केचन ।
तप्तताम्ररसं दीप्तं क्षिपन्ति मद्यपानतः ॥ १११

ये केचिद्दुस्सहा रोगाः विश्वदुःखविधायिनः ।
निस्सर्गेणाखिलास्तेस्युर्नारिकाङ्गे घृणास्पदे ॥ ११२

समुद्रसलिलासाध्यतृषाऽऽक्रान्ता हि नारकाः ।
बिन्दुमात्रं जलं पातुं लभन्ते न कदाचन ॥ ११३

विश्वान्नक्षणाऽशाम्या क्षुधा प्रज्वलिता हृदि ।
तिलमात्राशनं भोक्तुमाप्नुवन्ति न जातु ते ॥ ११४

लक्षयोजनमानोऽयःपिण्डःक्षिप्तो विलीयते ।
अत्राऽहो सहसा शीततुषारेण न संशयः ॥ ११५

---

1 प्रारेभिरे -A

इत्यादि विविधं दुःखं कविवाचामगोचरम् ।
अन्योऽन्योदीरितं क्षेत्रभवं शीतक्षुधादिजम् ॥ ११६

मनोवाक्कायसम्भूतं सर्वोत्कृष्टमनारतम् ।
महापापोदयेनात्र सोऽन्वभूद्दुःखमुल्बणम् ॥ ११७

त्रयस्त्रिंशच्छमुद्रान्तं रौद्रध्यानी कुमार्गगः ।
मनाक्शर्माविनान्येतत्कृष्णलेश्योऽशुभाशयः ॥ ११८

नेत्रोन्मेषादिमात्रान्तं सुखं ज्ञातुं न विद्यते ।
दुःखाब्धिमग्नमूर्तानां नारकाणां च पापिनाम् ॥ ११९

ततोऽसौ नरकादायुः क्षयान्निर्गत्य पापतः ।
दीर्घाङ्गोऽभून्महामत्स्यः स्वयंभूरमणार्णवे ॥ १२०

चिरायुरेषस्तत्रापि जीवराश्यादि भक्षणैः ।
सप्तमावनिपर्यन्तं दुःखदं पापमार्जयेत् ॥ १२१

पुनस्तत्पापपङ्केन[1] सोऽगमन्नरकं ततः ।
प्राक्सर्ववर्णनोपेतं सप्तमं दुःखसागरम् ॥ १२२

दुःखच्युतोपमं निन्द्यं संसारे यच्च दुःसहम् ।
सर्वोत्कृष्टं हि भूत्वात्र ततोऽसौ निर्गतोऽघभाक् ॥ १२३

इति षट्षष्टिवार्ध्यन्तं दुःखं भुक्त्वा निरन्तरम् ।
द्विवारं नरके पश्चाच्चिरं भ्रान्त्या भवार्णवे[2] ॥ १२४

कृत्स्नदुःखविधानेषु त्रसस्थावरयोनिषु ।
नानाविधेष्वभूदेषो कृतपुण्योऽत्र दुःखभाक् ॥ १२५

---

1 पाकेन - A 2 महार्णवे - A

इत्थं पापविपाकतोऽशुभगतो नानाविधे दुष्करे-
प्राप्तं दुःखमनारतं बहुविधं प्राग्मायायायं भवे ।
मत्वेतीह बुधास्त्यजन्तु सकलं पापं प्रयत्नेन च
कुर्वीध्वं व्रतसंयमैः प्रतिदिनं धर्मं जगत्सौख्यदम् ॥ १२६

धर्माधर्मनिरूपका जिनवरा धर्मस्य सर्वस्य ये-
प्राप्तास्सत्फलमूर्जितं निरुपमाः सिद्धा अनन्ता वराः ।
आचार्याश्शुभधर्मदेशनपराश्चाध्यापकास्साधव-
स्ते सर्वे जगदीश्वरैः स्तुतपदा दद्युस्स्वधर्मान्मम ॥ १२७

इति श्रीभट्टारकसकलकीर्तिविरचितेधन्यकुमारचरित्रे
अकृतपुण्यभवान्तर वर्णनो नाम
तृतीयोऽधिकारः
॥ श्रीरस्तु ॥

॥ अथ चतुर्थोऽधिकारः ॥

जिनान्धर्माधिपान्वन्दे सिद्धान्धर्मफलाङ्कितान् ।
सूरिंश्च पाठकान्साधून् धर्मतीर्थप्रवर्तकान् ॥ १

एकदोऽकृतपुण्योऽथ जगाम सोऽतिनिर्धनः ।
दीनः सुकृतपुण्यस्य चणकक्षेत्रमुल्बणम् ॥ २

तत्र तं प्रत्युवाचेति सकर्मकरवद्गिरा ।
ते हे सुकृतपुण्यात्रोऽत्पाटयेच्चणकान्बहून् ॥ ३

अहमुत्पाटयिष्यामि मह्यं दास्यसि किं वद ।
तं दृष्ट्वा तद्वचश्श्रुत्वा धीमान् स इति चिन्तयेत् ॥ ४

अहो पश्यात्र संसारे वैचित्र्यं विविधं नृणाम् ।
भवन्ति स्वामिनो भृत्याः स्वामिनः सेवका क्षणात् ॥ ५

यतोऽत्रास्य पितुर्नूनं प्रसादेन धनान्वितः ।
अहमेवं विधो जातो मान्यो ग्रामपतिर्महान् ॥ ६

एषोऽद्य प्रेषणं निन्द्यं याचते मां विधेर्वशात् ।
विपर्ययादि कर्तायमतो धीरस्तु दुर्विधिः ॥ ७

अथवा पापपाकेन धनिनो निर्धना जनाः ।
भवन्ति पुण्यपाकेन निर्धनाः धनिनः क्षणात् ॥ ८

मत्वेति निर्धनाः पुण्यं कुर्वन्तु धनसिद्धये ।
त्यजन्तु सकलं पापं धनिनो धनवृद्धये ॥ ९

विचिन्त्येति सकारुण्यहृदयस्तस्य दत्तवान् ।
स्वपोतात्शातकुम्भानाऽकृष्यादीप्तान् बहूंस्तदा ॥ १०

तत्क्षणं पापपाकेन विना पुण्येन तेऽखिलाः ।
तत्करे पतिता जाता अङ्गारा भस्मकारिणः ॥ ११

तान्वीक्ष्य स बभाणेति त्वं हे दानान् प्रयच्छसि ।
सर्वेभ्यश्चणकान्मह्यमङ्गाराकांश्च दाहकान् ॥ १२

ततः सुकृतपुण्योऽसौ ज्ञात्वा तं पुण्यवर्जितम् ।
आह प्रयच्छ मेऽङ्गारान् मदीयांस्त्वां शुभातिगः ॥ १३

यावन्तश्चणका नेतुं शक्तोऽसि मस्तकेन च ।
नीत्वाऽस्मात्तावतः क्षेत्राद्गच्छ बध्वा हि पोडलम् ॥ १४

अतोऽसौ बद्धयित्वाशु चणकानां सुपोडलम् ।
वस्त्रेण मस्तके धृत्वा सानन्दः स्वगृहं ययौ ॥ १५

तान्विलोक्य तदम्बेति तमपृच्छन्मदङ्गज ।
त्वयामी चणकाकस्मादानीतासून्ममादिशम् ॥ १६

ततोऽवादित्सु हे मातरानीताश्चणका इमे ।
क्षेत्रात्सुकृतपुण्यस्य तेन दत्ता मयाऽधुना ॥ १७

तदाकर्णनतः साऽऽह भूत्वा चित्तेऽतिदुखिनी ।
मद्भृत्यस्यात्र भृत्यत्वं जातं तेत्यघपाकतः ॥ १८

इति सोक्त्वा पुनश्चित्ते चिन्तयेदित्यहो सताम् ।
यत्र भुक्तं प्रभुत्वादि भृत्यत्वं तत्र नोचितम् ॥ १९

तस्माद्देशान्तरं नूनं गन्तव्यमभिमानिभिः ।
क्षये सति प्रभुत्वादौ दारिद्र्ये सन्मुखेऽद्भुतम् ॥ २०

तत्र यद्भविता पुंसां दुःखं भूयाच्च वा सुखम् ।
यतः पुण्यस्य वाघस्य फलं त्यक्तुं न शक्यते ॥ २१

विचिन्त्येति ततः सा तांश्चणकान् सम्बलं परम् ।
कृत्वा पुत्रेण सार्धं निर्ययौ देशान्तरं प्रति ॥ २२

अवन्तिविषये सीसवाकग्रामे क्रमेण सा ।
बलभद्राभिधग्रामपतेरेत्य गृहाङ्गणे ॥ २३

उपाविशत्सपुत्रातिपथोत्थश्रमगानये ।
तां वीक्ष्य बलभद्रोसौ पप्रच्छेति मात (रम्) ॥ २४

कस्मात्वमागतास्यस्मात् किमर्थं त्वं क्व यास्यसि ।
इति पृष्टापि तेनैषा लज्जया वर्तिनो यदा ॥ २५

पुनर्महाग्रहेणैव पृष्टा तदाह तं प्रति ।
अहो पापवशान्नृणां जायन्ते बहुधापदः ॥ २६

अत्र मागधदेशाच्चाऽऽगताऽहं दैवयोगतः ।
यत्र मे भवितावृत्तिस्तत्र यास्यामि निश्चितम् ॥ २७

तच्छ्रुत्वाह सचेदेवं तर्हि तिष्ठाऽत्र मद्गृहे ।
कुर्वन्न पचनं तेऽयं सुतो मद्वत्सकान्वने ॥ २८

चारयत्वेव दास्यामि युवाभ्यां निखिलान्स्पुटम् ।
सद्वस्त्रग्रासवासादीन् यथा योग्यानहं सदा ॥ २९

तदाकर्ण्य विचार्यं च एवमस्त्विति साऽऽवदत् ।
सोऽतस्तृणकुटीं कृत्वा स्वगृहान्ते ददौ तयोः ॥ ३०

तस्यां तत्प्रेषणं नित्यं कुर्वन्तौ तौ स्वकर्मजम् ।
[1]तद्दत्तग्रासवासादीन् भुञ्जानौ तस्थतुस्सदा ॥ ३१

1 तद्दत्तौ - A

प्रत्यहं बलभद्रस्य सप्तपुत्रान् सुपायसम् ।
भुञ्जानान्वीक्ष्य स स्वाम्बां याचते पायसं तराम् ॥ ३२

तद्वाञ्छयाह मातेति पुत्रपुण्यादृते क्वचित् ।
पायसं लभ्यते भोक्तुं न खण्डघृतम्मिश्रितम् ॥ ३३

त्वयागतभवेत्किञ्चिन्नकृतं पुण्यमत्र वा ।
तद्भुक्तिकारणं तेऽहं कस्माद्ददामि पायसम् ॥ ३४

यतोऽभीष्टान्नपानाद्याः सद्वस्त्रभूषणादयः ।
धनधान्यसुखादीनि न प्राप्यन्ते वृषादृते ॥ ३५

तयेति बोधितोऽप्येषो जानन्कृत्ये ततो मुहुः ।
(मातरं)[1] पायसं याचंस्तदप्राप्त्या रटेद्यदा ॥ ३६

तदादि निर्दयाः सप्तबलभद्रस्य सूनवः ।
तन्मुखे ताडयन्त्येत्य चपेटाद्यैः प्रहस्य च ॥ ३७

इति तत्ताडनैस्तस्यैकदा पायसवाञ्छया ।
मुखं शोफयुतं जज्ञे पापेनातिविरूपकम् ॥ ३८

तथाविधं तमालोक्यापृच्छत्स पामराधिपः ।
भद्र ! ते वदनेद्यैव शोफोऽभूत्केन हेतुना ॥ ३९

ततः प्राह स दीनात्मा प्रभो मेऽयं बभूव च ।
चपेटा(ताडनैः)[2] पायसाप्राप्त्या पापकर्मणा ॥ ४०.

तच्छ्रुत्वा कृपया चैषोऽवादीत्तन्मातरं प्रति ।
अस्मद्गृहात्त्वमम्बा हि घृतदुग्धादि दण्डुलान् ॥ ४१

गृहीत्वा स्वगृहे नीत्वा पक्कं पायसमूर्जितम् ।
भोक्तुं दत्वा स्वपुत्रस्य क्षीरवाञ्छां (प्रपूरय)[1] ॥ ४२

इत्युक्त्वा सा मुदाऽऽदाय तद्गृहात्तण्डुलादिकान् ।
आनीय स्वगृहेऽवादीत् तद्गिरेति सुतं प्रति ॥ ४३

अद्य ते कृतपुण्योऽहं भोक्तुं दास्यामि पायसम् ।
पुण्यपाकभवं शीघ्रमागन्तव्यं त्वया गृहे ॥ ४४

अहमेवं करिष्यामि भणित्वेत्यटवीं ययौ ।
निजवत्सान्गृहीत्वाशु तुष्टा सा यष्टिकाकरः ॥ ४५

इतस्तया सुयत्नेन पक्कं तत्पायसादिकम् ।
ततः स कृतपुण्यो हि मध्याह्ने गृहमागतः ॥ ४६

सा गच्छति जलार्थं तं धृत्वा स्वगृहपालकम् ।
प्राहेति सुत यः कोऽप्यत्रागच्छति सुभिक्षुकः ॥ ४७

तं गन्तुं मां प्रयच्छ त्वं तस्मै दत्वा शुभाशयौ ।
वरं दानं ततः शेषमावां मोक्ष्याव ऊर्जितम् ॥ ४८

येन सत्पात्रदानेनावयोः जन्मनि जन्मनि ।
ईदृशः प्रवराहारो भवेद्धा त्रिजगत्सुखम् ॥ ४९

यतोऽत्र सफलः पुंसां सद्दानेन गृहाश्रमः ।
हेतुः कीर्तिश्शुभादीनामिहामुत्र हितप्रदः ॥ ५०

सम्पदो दानिभिर्दानाल्लभ्यन्ते विश्वगोचराः ।
पदे (पदे)[2] निधानानि भोगभूमिसुखानि च ॥ ५१

सद्दानेन विना पुंसामश्मपोतोपमोऽशुभः ।
गृहाश्रमो जगन्निन्द्यः पापाढ्यो दुर्गतिप्रदः ॥ ५२

मुहुर्दारिद्र्यदग्धानां वास्माकं पायसादिकम् ।
कुतःसम्पद्यते तस्माद्दातव्यं दानमद्य तत् ॥ ५३

येन प्रवरदानेनावयोः सार्थो गृहाश्रमः ।
जन्मस्यात्सफलं पुण्यं परं स्वर्श्रयादिकारणम् ॥ ५४

इति तस्य प्रदायैषा शिक्षादानं शिवाप्तये ।
नीराय निर्ययौ तस्याद्दानसद्भावनान्विता ॥ ५५

तावत्तत्पुण्यपाकेन बाह्यान्तरसङ्गवर्जितम् ।
अनर्ध्य दृग्महाज्ञानचारित्रं रत्नसङ्गिनम् ॥ ५६

दातृणां शुभसौख्याप्त्यै कल्पवृक्षोपमं परम् ।
तपोभिः क्षीणसर्वाङ्गं महान्तं गुणराशिभिः ॥ ५७

विश्वजन्तु हितोद्युक्तमङ्गपूर्वाब्धिपारगम् ।
ईर्ष्या पथ्यात्रसन्नेत्रं विरक्तं विश्ववस्तुषु ॥ ५८

उच्चनीचादि सद्गेहाचिन्तकं धर्मदेशकम् ।
त्रिजगत्पतिभिर्भव्यैर्वन्दितं चार्चितं स्तुतम् ॥ ५९

लाभालाभसुखासौख्यहेमादि समदर्शनम् ।
जितेन्द्रियं जगन्नाथं सोममूर्तिं दयास्पदम् ॥ ६०

दिशाम्बरधरं धीरमनेक(र्धि विभूषितम्)[1] ।
सर्वोत्कृष्टमहापात्रं सुव्रताख्यं मुनीश्वरम् ॥ ६१

1 - A

एकमासोपवासस्य पारणाह्ने जिताशयम् ।
तस्य ग्रामपतेः गेहमागच्छन्तं जगद्धितम् ॥ ६२

कायस्थित्यैविलोक्यैष दूरस्थं शुद्धमानसः ।
पुण्यादकृतपुण्यो हि पुण्यकर्मेति चिन्तयेत् ॥ ६३

अहो महानयं भिक्षुर्वस्त्राद्यभावतः स्फुटम् ।
तस्मादायाति मे पुण्याद्गन्तुं नास्माद्ददामि तम् ॥ ६४

विचिन्त्येति स भद्रात्मा स्वपुण्यप्रेरितस्ततः ।
गत्वाशु संमुखं तस्य प्रणम्योवाच सद्वचः ॥ ६५

हे पितामह मन्मात्रा पायसं पक्कमूर्जितम् ।
तुभ्यं प्रदीयते भोक्तुं तिष्ठ त्वं प्रार्थितो मया ॥ ६६

यावदायाति मन्माता जलमादाय निश्चितम् ।
मुनिराह ततो भद्र स्थातुं मार्गे न मे क्वचित् ॥ ६७

भणित्वेति मुनीन्द्रोऽसौ गन्तुं लग्ने पथे शनैः ।
ततः स्थित्वा तदग्रे स प्रसार्य स्वकरोऽवदत् ॥ ६८

तात मत्कृपया तिष्ठ क्षणैकं मा व्रज गृहात् ।
अपूर्वपायसं पक्कमस्ति नष्टं हि तत्र किम् ॥ ६९

इत्याद्यै प्रार्थनालापैः प्रार्थितोऽपि यतीश्वरः ।
न तिष्ठति यदा तं सोऽब्रवीद्धृत्वाऽऽशुपादयोः ॥ ७०

अधुनास्मान्मयाह्यंघ्र्योः स्वपाणिभ्यां धृतोत्कटः ।
कथं यास्यसि मे ब्रूहि यतस्त्वं सुष्ठुदुर्बलः ॥ ७१

मुनीन्द्रस्तत् कृपाक्रान्तो मनाक् तं न विरोधयेत् ।
मौनेनात्र तथैवास्थाद्विश्वजन्तुदयावहः ॥ ७२

तस्मिन्नवसरे तस्य महापुण्योदयेन सा ।
मृष्टदानाविचारज्ञा दयाम्बुकुम्भमागमत् ॥ ७३

सत्पात्रं तत्र तं वीक्ष्य निधानमिव दुर्लभम् ।
परमानन्दमासाद्य घटमुत्तार्य भूतले ॥ ७४

उत्तरीयांशुकं स्कन्धे क्षिप्त्वा प्रणम्य तत्क्रमौ ।
तिष्ठ! तिष्ठ! मुदेत्युक्त्वा प्रतिजग्राह सा सती ॥ ७५

ततः प्रोच्चासनं दक्षो(दत्वो)पवेश्य तं जगद्गुरुम् ।
उष्णोदकेन पादाब्जौ तस्य प्रक्षाल्य तज्जलम् ॥ ७६

प्रवन्द्य शुद्दिदं मूर्ध्ना पूज्यानुप्रणम्य च ।
कृत्वा त्रियोगशुद्धिं च एषणाशुद्धिं साकरोत् ॥ ७७

एतैर्नवप्रकारैस्सत्पुण्योपार्जितहेतुभिः ।
भक्त्यैषा सह पुत्रेण महापुण्यं तदार्जयत् ॥ ७८

श्रद्धाशक्तिरलुब्धत्वं भक्तिज्ञानं दया क्षमा ।
इमान्दातृगुणान्सप्तस्व चक्रे सा विचक्षणा ॥ ७९

ततः क्षीरान्नदानं तन्मधुरं प्रासुकं शुभम् ।
निर्दोषं तृप्तिदं शुद्धं तपोवृद्धिकरं महत् ॥ ८०

आरेभे विधिना दातुं तस्मै सत्पात्रयोगिने ।
बलभद्रगृहात्सा मुदानीय भाजनादिकम् ॥ ८१

भुञ्जानं तं महापात्रं पश्यन्विस्फारितेक्षणः ।
स पुण्योऽकृतपुण्योऽत्र ह्यार्जयत्पुण्यमद्भुतम् ॥ ८२

अद्याहं सुकृतीभूतोऽतिधन्यः पुण्यवान्महान् ।
कृतार्थेति सुखीजातो महादाता च धर्मधीः ॥ ८३

अद्य मे सफलं जन्म सार्थकोऽयं गृहश्रमः ।
जातं च प्रवरं पुण्यं स्वर्गराज्यादि भूतिदम् ॥ ८४

यतः परमपात्रोऽयं देवो वन्द्योऽर्चितः स्तुतः ।
जगल्लोकैर्महान्भुङ्क्ते मद्भाग्यान्मे गृहेऽद्य भो ॥ ८५

इति तद्भावनाभिश्चार्जवभावेन शुद्धधीः ।
उपार्जयन्महत्पुण्यं सर्वदा स्वविभूतिदम् ॥ ८६

मुनिपाणिपुटेनासौ स्वादयित्वा जितेन्द्रियः ।
स्थित्वा भुक्त्वा तदाऽऽहारं समचित्तेन तद्गृहम् ॥ ८७

पवित्रीकृत्य दातारौ तौ चाशीर्वाददानतः ।
वनं ययौ ततश्शीघ्रं ध्यानाध्ययनसिद्धये ॥ ८८

सन्मुनेर्विद्यतेऽक्षीणमहानसर्द्धिरूर्जिता ।
निष्पापसत्तपो जाता तद्दिने चाक्षयप्रदा ॥ ८९

तस्या माहात्म्यतः सा तद्दिने रसवती शुभा ।
मनाङ्मेक्षीयते चक्रवर्तिसैन्यादि भोजनैः ॥ ९०

तदा तयोर्गृहे जाताः समस्तास्तेऽक्षयो जिताः ।
क्षीरान्नघृतखण्डाद्या महर्षिदानपुण्यतः ॥ ९१

तत्पायसं यथेष्टं सामृष्टदाना निजं सुतम् ।
भोजयित्वा स्वयं पश्चात् बुभोज पुण्यशालिनी ॥ ९२

ततो रसवतीं ज्ञात्वाऽक्षीणां सा भोजयत्तराम् ।
अमन्त्र्य सकुटुम्बं तं बलभद्रं शुभाप्तये ॥ ९३

तद्भोजितेऽपि विज्ञाय क्षीरान्नादीनक्षयातिगान् ।
विश्वतद्ग्रामलोकानां सा भोजनान्यपूरयत् ॥ ९४

तदा तद्दानपुण्येन तौ जातौ पुण्यकारिणौ ।
लोके मान्यौ च विख्यातौ चन्द्रांशुकीर्तिभागिनौ ॥ १५

दानं दुर्गतिनाशनं हितकरं दानं बुधाःकुर्वते-
दानेनैव गृहस्थता गुणवती दानाय यत्नं सताम् ।
दानान्नास्त्यपरः सुभोगजनको दानस्य योग्यो विदो
दाने दातुमनःस्थिर्तिं प्रकुरुते दानं ददध्वं जनाः ॥ १६

ये कालत्रयविश्वतत्त्वकथका धर्माधिपाः श्रीजिनाः-
सिद्धा अन्तविवर्जिता निरुपमा लोकाग्रराज्ये स्थिताः ।
आचांर्याश्च सुपाठकाः सुतपसः तत्साधवस्तेऽखिलाः
पञ्चाचारपरायणा निजगुणाप्त्यै सन्तु मे वन्दिताः ॥१७

इति श्रीभट्टारकसकलकीर्तिविरचितेधन्यकुमारचरित्रे
अकृतपुण्यदानकरणवर्णनो नाम
चतुर्थोऽधिकारः.
॥ श्रीरस्तु ॥

।। पञ्चमोऽधिकारः ।।

दृक्चित्तवृत्ततपोधर्मानिर्घ्यरत्नप्रदान् सताम् ।
त्रिजगत्स्वामिवन्द्याङ्घ्रीन्वन्देऽहं परमेष्ठिनः ।। १

अथोऽयं वत्सपालो द्वितीये दिने सु पायसम् ।
तद्भुक्त्वोद्धरितं वत्सानग्रे कृत्वाटवीं ययौ ।। २

तत्रैकस्मिंस्तरोर्मूले सबलाहारदोषतः ।
सन्निद्राराक्षसीग्रस्तः सुप्तोऽभूत्स्यन्दनातिगः ।। ३

ततस्तस्य स्वयं वत्सास्तं विना स्वगृहं ययुः ।
विलोक्य मृष्टदाना (न्) तान् स्वचित्ते हीत्यचिन्तये(य)त् ।। ४

पतेऽहो आगता वत्सा मत्पुत्रो नागतः कुतः ।
विचिन्त्येति शुचार्ता साऽऽरेभे कर्तुं कुरोदनम् ।। ५

उपरोधेन तस्याः स बलभद्रो व्रतो गृहात् ।
निर्जगामोद्यतो भृत्यैर्गवेषयितुं आशु तम् ।। ६

स जागरितः उत्थाय वत्सपालश्शुचाकुलः ।
अदर्शनेन वत्सानां आगच्छन्स्वगृहं ततः ।। ७

दूरस्थं बलभद्रं तमागच्छन्तं स्वसम्मुखम् ।
निरीक्ष्य तद्भयेनाशु ह्यारुरोहान्तरे गिरिम् ।। ८

ततो व्याधुटितः पामराधिपस्तदवीक्षणात् ।
वत्सपालस्स तत्रैव गुहा द्वारी शुभास्थितः ।। ९

तद्गुहांमध्यभागेऽत्र प्राक्तनः स मुनीश्वरः ।
ज्ञानी सुवृतनामास्ते कुर्वन् व्यावर्णनं परम् ।। १०

व्रतस्वरूपभेदानां तत्फलादेश्च सद्गिरा ।
श्रावकाणां सुधर्माय गतानां वन्दितुं गुरुम् ॥ ११

इमानि दृग्वृतान्येष कथयेच्छ्रावकान् प्रति ।
तद्बहिर्संस्थितो वत्सपालः श्रृणोति श्रद्धया ॥ १२

सर्वेषां व्रतधर्माणां प्रवरं दर्शनं मतम् ।
मूलभूतं जगत्पूज्यं मूलवद्धामशाखिनाम् ॥ १३

(विश्वतत्वपदार्थार्हि)[1] धर्मागमादि योगिनाम् ।
शङ्कादि दोषदूरं यच्छ्रद्धानां तद्धि दर्शनम् ॥ १४

सप्तदुर्व्यसनान्यत्र सप्तश्वभ्रपदान्यपि ।
महापापकराण्यादौ त्याज्यानि सर्वदा बुधैः ॥ १५

मद्यमांसमधून्याशु सहोदुम्बरपञ्चकैः ।
त्यज्यन्ते गृहिणामष्टौ स्मृता मूलगुणा नृणाम् ॥ १६

इमे मूलगुणा यस्य पाल्यन्ते व्यसनोर्जिताः ।
सर्वासां मूलभूता सा प्रतिमा दर्शनाभिधा ॥ १७

स्युः पञ्चाणुव्रतान्यादौ त्रिविधं स्याद्गुणव्रतम् ।
शिक्षाव्रतानि चत्वारि व्रतानि द्वादशानि च ॥ १८

(पु)[2]ष्कलत्रयपञ्चाक्ष त्रसाणां सुष्ठुलक्षणम् ।
मनोवाक्काययोगैर्यत् कृपाद्यैश्च विधीयते ॥ १९

व्रताय व्रतिभिस्तस्यादहिंसाणुव्रतं महत् ।
बीजं धर्मव्रतादीनां सर्वेषां मूर्ध्नि संस्थितम् ॥ २०

---

1 - A 2 विकल - A

यतो व्रतादयो विश्वश्रावकाणां महात्मनाम् ।
सामिदाद्याजिनैश्चोक्ता एकाहिंसाव्रताप्तये ॥ २१

हितं मितं बुधैर्मान्यं मधुरं धर्मकारणम् ।
निःसन्देहं वचः सत्यं विश्वजीवदया[1] वहम् ॥ २२

काठिन्यपरनिन्दादि वर्जितं ब्रूयतेऽत्र यत् ।
तत्सत्याणुव्रतं कृत्स्नविद्या यशः शुभाकरम् ॥ २३

पतितं विस्मृतं नष्टं व्रतं चान्यधनाधिकम् ।
परपीडाकरम् निन्द्यं वीथिगेहादिषु क्वचित् ॥ २४

धर्माय पापभीतैर्यत् कालाहिवन्न गृह्यते ।
ततस्तेयव्रतं स्थूलं त्रिजगच्छ्रीसुखावहम् ॥ २५

परस्त्रियोऽखिला यत्र दृश्यन्ते शुद्धमानसैः ।
त्रिशुद्ध्यामातृभगिनी सन्निभा रागवर्जितैः ॥ २६

सच्छीलैश्शीलधर्मार्थं स्वस्त्रीसन्तोषकारिभिः ।
त्रिजगत्पतिभिः पूज्यं तच्चतुर्थमणुव्रतम् ॥ २७

क्षेत्राद्या दशभेदा ये परिग्रहादि गेहिनाम् ।
लोभवृद्धिकरा निन्द्याश्चिन्ता दुःखशतप्रदाः ॥ २८

तेषां यत्क्रियते दक्षैः प्रमाणां लोभ शान्तये ।
पञ्चमाणुव्रतं तस्याल्लोभघ्नं श्रीसुखाकरम् ॥ २९

गमने योजनाद्यैर्या सङ्ख्या दशदिशां सताम् ।
कृतासन्तोष्यहेत्वादि तत्स्याद्दिग्विरतिर्व्रतम् ॥ ३०

---

1 वाभया - A

हिंसादि सर्व सावद्यास्त्यज्यन्ते हि निरर्थकाः ।
पापदा यत्र तच्चानर्थदण्डविरति व्रतम् ॥ ३१

पापोपदेशहिंसादानापथ्यानि दुःश्रुतिः ।
ततः (प्रमाद)[1] चर्यास्ताः[2] पञ्चभेदा अघप्रदाः ॥ ३२

कन्दमूलादयोऽनन्तजीवयुक्ता विषोपमाः ।
क्रीडाढ्या फलपुष्पाद्या निन्द्याश्चाच्छानकादयः ॥ ३३

अन्नपानादिभोगानां वारैकसुखकारिणाम् ।
वस्त्रभूषणभार्याद्युपभोगानां खशान्तये ॥ ३४

प्रमाणं क्रियते दक्षैः यच्चार्यत्वाक्षतस्करान् ।
भोगोपभोग संख्यानां तद्धिश्वभोगमन्दिरम् ॥ ३५

पाटकग्रामवीथ्याद्यैर्दिशांसंख्या दिनं प्रति ।
गृह्यते गमनादौ या तच्च देशावकाशिकम् ॥ ३६

सन्ध्यात्रयेऽपि शुद्धया या वन्दनात्र विधीयते ।
अर्हसिद्धजिनार्चार्हद्धचो धर्मादियोगिनाम् ॥ ३७

त्यक्त्वार्तरौद्रदुर्ध्यानान् विधाय समतां बुधैः ।
महाधर्मप्रदं पापहं तु सामायिकं हि तत् ॥ ३८

अष्टम्यां च चतुर्दश्यां पापारम्भान् गृहोद्भवान् ।
सन्त्यज्य स्थीयते यत्र धर्मध्यानेन धार्मिकैः ॥ ३९

नियमेनोपवासश्च गृहीत्वा गुरुसन्निधौ ।
शिक्षाव्रतं तृतीयं तत् पापघ्नं धर्मकारणम् ॥ ४०

---

1 - A 2 चर्यासह्याः - A

नियमेन गृहद्वारं पात्रदानाय लोक्यते ।
साक्षाद्वा दीयते दानं पात्राय भक्तिपूर्वकम् ॥ ४१

मध्याह्ने दानिभिर्नित्यं यत्र शिक्षाव्रतान्तिमम् ।
स्वान्येषां हितकृद्धिश्वश्रीभोगसुखकारणम् ॥ ४२

एतानि द्वादशैवात्र व्रतानि प्रतिपाल्य च ।
अविचाराद्दते यत्नाद्यावज्जीवं बुधैर्द्धिधा ॥ ४३

अन्ते सल्लेखना कार्या हत्वा मोहग्रहादिकान् ।
दीक्षामादाययत्नेनोपवासाद्यैः क्षमादिभिः ॥ ४४

यानि व्रतानि सर्वाणि गृहीणां सफलान्यपि ।
स्वर्गमुक्त्यादि कर्तॄणि जायन्ते परमानि च ॥ ४५

द्वितीया प्रतिमात्रैषा द्वादशव्रतगोचरा ।
अन्या सामायिकाख्या च चतुर्था प्रोषधाभिधा ॥ ४६

त्वक्बीजफलपत्रादि स चित्तानां (च भक्षणम्)[1] ।
सर्वदा जीवयुक्तानामप्रासुकजलाङ्गिनाम् ॥ ४७

कारुण्याद्यैः कृपासिध्यैस्त्यज्यते यच्चिवाप्तये ।
पञ्चमी प्रतिमा सोक्ता जिनैर्जीवहितप्रदा ॥ ४८

खाद्यस्वाद्यान्नपानाद्यैः सर्वाहारश्चतुर्विधः ।
त्यज्यते यो निशाभागे जीवभक्षणसद्भयात् ॥ ४९

दिने ब्रह्मव्रतं धार्यं ते यद्देहादिकेष्वपि ।
(षष्टी सा प्रतिमासारोप)[2] वासार्धफलप्रदा ॥ ५०

सर्वदा ब्रह्मचर्यं यत् त्यक्तरागैः प्रपाल्य तैः ।
विष्टादि घटिका मत्वा त्यक्त्वा दूरं स्त्रियोऽखिलाः ॥ ५१

ब्रह्मचर्याह्वया सात्र सप्तमी प्रतिमा वरा ।
विश्वशर्माखनी विश्वलोकाग्रपदकारिणी ॥ ५२

गृहवाणिज्यकृष्यादि भवारम्भाघकारकः ।
समस्तो हीयते योऽत्र मनोवाक्कायकर्मभिः ॥ ५३

पापभीतैश्शिवाद्यासैः साष्टमी प्रतिमा परा ।
धर्मशर्माकराकृत्स्नपापास्रवनिरोधिनी ॥ ५४

[वस्त्रमात्रं विना शेषः परिग्रहो धनादिकः ।
त्यज्यते यास्त्रिशुद्धयात्र हत्वा मूर्छादिराक्षसीम् ॥][1]

सन्तोषाद्भुतखड्गेन धी धनैर्नवमी हि सा ।
प्रतिमादर्शनज्ञानवृत्तादि रत्नसत्खनी ॥ ५५

गृहकार्यविवाहादौ स्वान्नपानादिकेषु च ।
पापारम्भे समस्तेऽत्र जीवराशिक्षयङ्करे ॥ ५६

त्यज्यते सम्मतिर्या त्रिशुद्ध्या शिवार्थिभिस्सदा ।
दशमी प्रतिमा सोक्ता संयमश्री सुखाम्बिका ॥ ५७

कृतकारित संकल्पादि दोषाऽखिलवर्जिता ।
भिक्षा वृत्यान्यगेहे या भिक्षात्र भुज्यतेऽनघा ॥ ५८

खण्डवस्त्रधरो यत्नात्कायस्थित्यै तपोऽर्थिभिः ।
प्रतिमासाजगद्वन्द्या श्रेष्ठैकादशमी शुभा ॥ ५९

---

1 - A मातृकायां दृश्यते ।

इमा एकादशैवात्र प्रतिमाः श्रावकोत्तमाः ।
दृक् ज्ञानिनो निरागाः प्रयत्नेन पालयन्ति ये ॥ ६०

षोडशस्वर्गपर्यन्तं सुखं वाचामगोचरम् ।
चक्रवर्त्यादिजं भुक्त्वा ते यान्ति तपसा शिवम् ॥ ६१

श्रृण्वतोऽकृतपुण्यस्य व्रतान्ये तानि चादरात् ।
तस्याभून्महतीश्रद्धा भावेनेति व्रतादिषु ॥ ६२

अहो इमानि साराणि व्रतानि सकलानि मे ।
त्रिजगद्धर्मकर्तॄणि सम्पद्यन्तां भवे भवे ॥ ६३

अनेन परिणामेन तस्यासीत्पुण्यमूर्जितम् ।
व्रतादि भावनोत्थेन तत्क्षणं स्वर्गसाधकम् ॥ ६४

ततस्ते श्रावकान्नत्वा तद्बहिर्निर्ययुर्मुनिम् ।
तं नमो अघहन्तारं भणित्वेति शुभाशयः ६५

सोऽप्यर्हं तं नमस्कारपदं तत्राभणंस्तदा ।
इमं दूरं व्रजेत्तेषां पृष्ठे शुद्धाशयः पथि ॥ ६६

जपन्तं तं नमस्कारपदं तं भद्रकं शुभम् ।
जग्राह पापपाकेन क्रूरो व्याघ्रः क्रुधातुरः ॥ ६७

नमस्कार पदं तस्सः वदंस्तेनातिपापिना ।
खाद्यमानो मुमोचाशु प्राणान्शुभसमाधिना ॥ ६८

सद्दानव्रतसद्भावना जाप्योत्थ शुभोदयात् ।
जज्ञे महार्धिको देवः सौधर्मेऽसौ ततो दिवि ॥ ६९

अहो अकृतपुण्यस्य महाभाग्योदयेन च ।
दुर्लभं पात्रदानं सुदुर्लभा व्रतभावना ॥ ७०

निधिवत्सुष्ठुदुष्प्राप्यः सन्मन्त्रो तेऽभवत्तराम् ।
त्रिधर्माधर्मसामग्री तादृशी तद्गतिप्रदा ॥ ७१

वा नृणां भाविनीयात्र गतिः शुभाथवाशुभा ।
जायेत सर्वसामग्री तादृशी तद्गतिप्रदा[1] ॥ ७२

इतस्तन्मोहिनी माता प्रभातसमये समम् ।
यत्नान्गवेषयन्ती तं बलभद्रेण शोकिनी ॥ ७३

क्रमेण तं गिरिं गत्वा ददर्श तत्कलेबरम् ।
पतितं तत्र बीभत्समर्धभक्षितमाशु सा ॥ ७४

तद्दर्शनान्महाशोकं सा तःप्राप्यातिरोदनम् ।
आरेभे कर्तुमत्यन्ता क्रन्दादि करुणास्वनैः ॥ ७५

अथ देवस्स तत्राप दीप्रं संपूर्णयौवनम् ।
दिव्योपपादशय्यायां मुहूर्तेनातिसुन्दरम् ॥ ७६

उत्थाय शयनात्तस्मात्सुप्तोत्थित इवामरः ।
निरीक्ष्य तद्विमानस्था महतीः सम्पदः पराः ॥ ७७

दिव्यरूपा महादेवी नम्रीभूतान्सुरव्रजान् ।
अन्यांश्च रत्नसौधादीन् साश्चर्य इति चिन्तयेत् ॥ ७८

अहो कोहं महानेष कः प्रदेशःसुखाकरः ।
दिव्यदेहा इमे देवाः के काः इमा वरस्त्रियः ॥ ७९

विमानादि गता बह्व्यः कस्येदृश्यो विभूतयः ।
केनातिपुण्यपाकेनात्रानीतोऽस्मि शुभास्पदे ॥ ८०

---

1. द्विसप्ततितमः श्लोकः - A मातृकायां न दृश्यते ।

इत्यादि चिन्तनात्तस्य सावधिज्ञानमूर्जितम् ।
प्रादुर्बभूव निश्शेष प्राग्जन्मशुभसूचकम् ॥ ८१

तेनावबुध्य सर्वं स दानादि जनितं फलम् ।
कुर्वन्तीं रोदनं चाम्बा व्यधाद्धर्मे मतिं दृढाम् ॥ ८२

ततः श्रीधर्मसिध्यर्थं गत्वा श्रीजिनमन्दिरम् ।
चकारमहतीं पूजामर्हतांशु(श्च) वर्धिनीम् ॥ ८३

सङ्कल्पमात्रसञ्जातैः दिव्यैस्सोर्च्चनवस्तुभिः ।
जलादि फलपर्यन्तैः गीतवाद्यस्तवादिभिः ॥ ८४

ततः स्वपुण्यसंञ्जातां स्वीकृत्य स्वक्रियां पराम् ।
लसत्केतुमहाघण्टानादमुक्तास्रगंकितम् ॥ ८५

दिव्यं विमानमारुह्य विभूत्या परमा समम् ।
शीघ्रं बोधयितुं स्वाम्बामागमत्स महीतलम् ॥ ८६

वीक्ष्य शोकभराक्रान्तां तां तत्र शोकहानये ।
उवाचेदं वचःसारं दिव्यवाण्यामरोत्तमः ॥ ८७

मातर्मां स्वर्गमापन्नं तत्सुतं वेत्सि किन्नवा ।
(त्वं वृथा रोदनं शो)[1] कान्मा विधेह्यशुभाकरम् ॥ ८८

यतोऽहं पात्रसद्दानव्रतसद्भावनाफलात् ।
महामन्त्रान्महान्जातः ईदृशो दिवि निर्जरः ॥ ८९

विश्वशर्माकरीभूते स्वर्गे या ऋद्धयः पराः ।
विद्यन्ते दुःखदूरास्थाः कथ्यमाना मया श्रुणु ॥ ९०

पञ्चवर्णविमानाः स्वर्गेऽसंख्यासंख्ययोजनैः ।
विस्तीर्णा मणिसौधाद्रिचैत्यगारादि भूषिताः ॥ ९१

गावः कामदुघास्तत्र कल्पवृक्षा हि पादपाः ।
रत्नसारानिसर्गेण चिन्तामणयऊर्जिताः ॥ ९२

बह्व्यो देव्यो महारूपलावण्यरसखानयः ।
सर्वाणि सुखसाराणि सन्ति पिण्डीकृतानि च ॥ ९३

यस्तत्र दुःखितो दीनो रोगी मूर्खो गतप्रभः ।
रूपहीनो दरिद्रो वा स न स्वप्नोऽपि दृश्यते ॥ ९४

दुःखदा ऋतवः सन्ति न शीतोष्णादि सङ्कुलाः ।
अहोरात्रादि भेदो न तत्र नान्यच्च दुःखकृत् ॥ ९५

किन्तु कल्पे भवेदेकः साम्यकालः सुखप्रदः ।
दिवसश्च सदा सौख्यं कविवाचामगोचरम् ॥ ९६

इत्यादि सुखसम्पूर्णे सौधर्मे(दुःखदूर)'गे ।
मया पुण्यात्स्वजन्मात्तं सुखसागरमध्यगम् ॥ ९७

विज्ञायेति त्वमम्बाशु शोकं मुक्त्वा मुदा चर ।
धर्मं मोहारिमाहत्य संयमं देवदुर्लभम् ॥ ९८

इत्यादि वचनालापैः सम्बोध्य तां स निर्जरः ।
गत्वा निजास्पदे तस्माद्भुङ्क्ते सौख्यं निरन्तरम् ॥ ९९

इति तद्वच(द्वाचं) आकर्ण्य साश्चर्यहृदया सती ।
मुक्त्वा शोकं विरक्ता सा मुदेति चिन्तयेत् हृदि ॥ १००

अहो यद्यल्पदानाद्यैरभूदेवं विघोऽप्ययम् ।
ईदृशा सम्पदा युक्तो मत्सुतो दिवि शर्मभाक् ॥ १०१

तर्हि तत्साधने धीमान् यत्नं केन करोत्यहो ।
व्रताद्यैर्निर्मलाचारैर्नृजन्मन्यतिदुर्लभे ॥ १०२

विचिन्त्य मृष्टदानेति त्यक्त्वा गेहादिकं ततः ।
तन्मोहनशुभाद्यासै दीक्षां जग्राह तत्क्षणम् ॥ १०३

जन्मान्तरेप्ययं भूयान्मे सुतः स्नेहकारकः ।
इति कृत्वा निदानं सा निन्द्यमज्ञानचेतसा ॥ १०४

यावज्जीवं तपश्शक्त्या विधायान्ते समाधिना ।
प्राणान्मुक्त्वाऽभवद्देवी तत्रैव सुखभागिनी ॥ १०५

बलभद्रोऽपि तं दृष्ट्वा ज्ञात्वा धर्मादि सत्फलम् ।
तदा त्यक्त्वा कुटुम्बादीन् क्षिप्त्वाशु च तपोऽनघम् ॥ १०६

कृत्वा (सन्यासमन्ते च मुकत्वा प्राणान्)[1] समाधिना ।
तत्कल्पे तत्सुरो लक्ष्म्यालङ्कृतः सत्तपः फलात् ॥ १०७

तत्र दिव्यं सुखं भुक्त्वा बलभद्रचरामरः ।
स सौधर्मादि हेत्या भूद्धनपालोऽभव(त्पिता)[2] ॥ १०८

(मृष्ट)[3] दानचरी देवी च्युत्वासौ धर्मकल्पतः ।
सा ते प्रभावती माता जातातिस्नेहनिर्भरा ॥ १०९

तत्र दिव्यान्परान्भोगाननुभूयशुभोदयात् ।
देवी निकरसम्भूतान्कुर्वन्पूजां जिनेशिनाम् ॥ ११०

1, 2 & 3 - A

वत्सपाल चरो देवः स सौधर्मान्निरोत्तमः ।
श्रीमानागत्य जातस्त्वमीदृशो दिव्यलक्षणः ॥ १११

प्राक्तना बलभद्रस्य ते सुतो दुष्टमानसाः ।
कुर्वाणाः स्वमतिं पूर्वां त्वन्मारणे विधेर्वशात् ॥ ११२

अभूवन् देवदत्ताद्या इह ते भ्रातरोऽखिलाः ।
पूर्व वैरादि संस्कारात् त्वां द्विषन्त्यत्र तेऽधमाः ॥ ११३

पदे पदे निधानानि प्रादुर्भवन्ति तेऽधुना ।
विघटन्ते कुविघ्नानि पात्रदान शुभोदयात् ॥ ११४

इत्थं पात्र सुदानसद्व्रतपरा सद्भावनानां फला-
च्चार्हन्नामजमन्त्रसार जपनाज्जातोऽत्र धन्यो महान् ।
त्वं विश्वर्धिविभूषितोऽतिसुभगो मत्वेतिधर्मं कुरु-
सद्दानव्रतभावनासुजपनैस्सर्वार्थसिध्यैस्सदा ॥ ११५

धर्मोऽत्र क्रियतां त्वया सुखनिधिर्धर्मं श्रय प्रत्यहं
धर्मेणाचर धर्मसारमतुलं धर्माय नित्यं नमः ।
धर्मान्नां(त्तं)भजचात्मना परमहो धर्मस्य मूलं चर !
धर्मे तिष्ठ! सुधर्म पाहि किल मां मत्वेति तं प्रार्थय ॥ ११६

इति श्रीभट्टारकसकलकीर्तिविरचितेधन्यकुमारचरित्रे
भवान्तरणवर्णनो नाम
पञ्चमोऽधिकारः
॥ श्रीरस्तु ॥

॥ अथ षष्ठोऽधिकारः ॥

ओम् । श्रीमत्रिजगन्नाथेभ्यो गरिष्टेभ्यो महागुणैः ।
परमेष्टिभ्य आत्माप्त्यै विश्वार्चाभ्यो नमोऽन्वहम् ॥ १

इति यत्यास्य सञ्जातं स सद्धर्मरसायनम् ।
पीत्वा जन्मजरामृत्यु विषघ्नं शिवकारणम् ॥ २

धन्यो भूत्वातिसन्तुष्टो दत्वा धर्मे दृढा मतिम् ।
मुनिं नत्वा क्रमेणैष ययौ राजगृहं पुरम् ॥ ३

स तत्पुर(ाद्बहि)[1] र्भागे निरीक्ष्य प्राविशद्वनम् ।
अनेकशुष्कवृक्षौघैः संकीर्णं श्रमहानये ॥ ४

वैश्यः कुसुमदत्ताख्यः स्वामी तस्य वनस्य च ।
राजकीयस्सुमालाकाराणां(मान्योऽ)[2]धिनायकः ॥ ५

विलोक्य तद्वनं शुष्कं तच्छेदनमनाः पुरा ।
उद्विग्नं मुनिमानम्य पप्रच्छावधिलोचनम् ॥ ६

भगवन्मद्वनं शुष्कं फलिष्यति न वा पुनः ।
यमी प्राह वणिक्कश्चिन्महापुरुष ऊर्जितः ॥ ७

पुण्याधिकोऽन्यदेशाच्चागत्य तत्र प्रविश्यति ।
तथैव फलपुष्पाद्यैः फलितं तद्भविष्यति ॥ ८

श्रुत्वेति योगि सद्वाक्यैर्विधाय निश्चयं परम् ।
तदा प्रभृति स श्रेष्ठी तत्पालयन् स्थितो मुदा ॥ ९

तदा धन्यकुमारस्य तत्प्रवे (श)नमात्रतः ।
शीघ्रं शुष्कसरांस्यासन् स्वच्छनीरभृतानि च ॥ १०

पत्रपुष्पफलैर्नम्रा जज्ञिरे वनपादपाः ।
अहो पुण्यप्रभावेन किं किं न जायते सताम् ॥ ११

धन्यस्तत्र जिनान् स्मृत्वैकस्मिन्सरसि सज्जलम् ।
पीत्वैकस्मिन् द्रुमूले ह्युपाविशच्छुभभावनः ॥ १२

साक्षाद्दृष्ट्वा तदाश्चर्यं स वैश्या हृदि योगिनाम् ।
वचस्स्मृत्वा पदान्नत्वागत्य प्रविश्य तद्वनम् ॥ १३

वीक्ष्य नत्वा कुमारं तमप्राक्षीदिति रूपिणम् ।
धीमन् कस्त्वं कुलं किं ते कस्मादत्रागतोऽसि च ॥ १४

स उवाचेत्यहं वैश्यात्मजो देशान्तरी भ्रमन् ।
अवन्ती विषयादत्रागतो जैनः शुभाप्तये ॥ १५

श्रेष्ठी बभाण यद्येवं तर्हि जैनोऽप्यहं महान् ।
स धर्मिस्नेहयोगेन प्रघूर्णस्त्वं तवाद्य मे ॥ १६

एवमस्त्विवति धन्यः सोऽवादीत्तं प्रतिजैनतः ।
ततोऽति सभ्रमेणासौ स्वगृहं तं मुदा नयत् ॥ १७

तस्य वात्सल्य भक्त्यैष इत्याख्यं स्वस्त्रियं प्रति ।
अयं मे भगिनीपुत्रोऽस्य प्राघुर्णक्रियाङ्कुरु (सत्क्रियाम्) ॥ १८

तच्छ्रुत्वा सा हि मज्जामातृकोत्रैषो भविष्यति ।
मत्वेति तस्यसत्स्नानभ्नोजनादीन् व्यधात्तदा ॥ १९

तस्य पुष्पावती पुत्री तद्दिव्यरूपवीक्षणात् ।
अत्यासक्ता बभूवाशु कुमारस्य शुभात्मनः ॥ २०

अन्येद्युरसा परीक्षायै विज्ञानादि गुणात्मनाम् ।
तस्याग्रे रम्यपुष्पाणि न्यधात्सूत्रं च धीमतः ॥ २१

कुमारो निजविज्ञानगुणेन कुसुमोत्करैः ।
मालामतिविशिष्टां च विचित्रामसृजत्क्षणात् ॥ २२

तदा तस्मिन्पुरे श्रीमान् श्रेणिको विद्यते नृपः ।
चेलिनी तस्य सद्राज्ञी पुत्री गुणवती तयोः ॥ २३

भोगार्थं राजपुत्र्याः सा पुष्पावती दिनं प्रति ।
नयति स्म सदा मालां प्रीतये शुभपुष्पजाम् ॥ २४

(ततो धन्यं)[1] कुमारेण सृष्टां मालां वणिक्सुता ।
निनाय प्रीतये भूपपुत्र्यः पार्श्वं तदागमत् ॥ २५

प्रीत्याह राजपुत्रीति पुष्पावति ममालयम् ।
द्वित्रीण्येव दिनानि त्वं किं नागतासि मां वद ॥ २६

सावोचत्सखि चायातो मत्पितुर्भगिनी सुतः ।
तस्याहं महतीं भक्तिं कुर्वन्ती स्वगृहे स्थिता ॥ २७

पुनर्विलोक्य तां मालां सेत्यपृच्छद्वणिक् सुताम् ।
केनेयं ग्रथितां माला विशिष्टा मन्मनः प्रिया ॥ २८

श्रेष्ट्यात्मजा हतेनेयं सृष्टा विज्ञानशालिना ।
सावादीत्सखि ते जातः पुण्यान्महान्वरोत्तमः ॥ २९

अथैकदा स धन्यात्मा कस्यचिच्छ्रेष्ठिनो वरम् ।
दृष्ट्वा पणं विचित्रं स्वैच्छया तत्र ह्युपाविशत् ॥ ३०

तदा तस्य महालाभो जनितः पुण्यपाकतः ।
तेनेभ्योऽसौ विबुद्ध्याशु पुण्याधिकं तमूर्जितम् ॥ ३१

बभाणेति सुहृत्तुभ्यं दास्यामि मत्सुतां शुभाम् ।
अहो धर्मे सतां धर्माल्लाभस्सर्वत्र नान्यथा ॥ ३२

अन्यदा शालिभद्राख्यः प्रसिद्धोऽस्ति वणिक्पतिः ।
तस्यापणे कुमारोसौ उपविष्ठो निजेच्छया ॥ ३३

तस्याप्यभून्महालाभस्तं ज्ञात्वा सोऽवदत्सुधीः ।
सुभद्रां भद्रमद्भगिनीं तेऽहं दास्यामि शर्मणे ॥ ३४

अन्येद्युः प्रवरो राजश्रेष्ठी श्रीकीर्ति संज्ञकः ।
इमां सद्घोषणां लोके पुरमध्ये ह्यकारयत् ॥ ३५

वैश्यात्मजो त्रयः काकीह्येकस्मिन्दिवसे शुभात् ।
सहस्रैकं सुवर्णं किलोपार्ज्य मे प्रयच्छति ॥ ३६

तस्मै दास्यामि मत्पुत्रीं श्रेष्ठां धनवतीं शुभाम् ।
श्रुत्वा तां घोषणां धन्यो जग्राह तत्क्षणं ततः ॥ ३७

तद्दत्तां काकिणीमेकां गृहीत्वाशु महामतिः ।
ततो जग्राह मालालम्बनतृणानि भूतये ॥ ३८

मालकारेभ्य एवासौ तानि दत्वा ततश्शुभात् ।
आददौ बहुपुष्पाणि नानावर्णशुभान्यपि ॥ ३९

सद्विज्ञानी कुंमारोऽसौ तैस्सुगन्धैः स्वपाणिना ।
चकारातिविशिष्टाश्च बह्वी माला विचित्रिताः ॥ ४०

गच्छतां राजपुत्राणां क्रीडार्थं (सद्धनं)[1] प्रति ।
अदर्शयत्कुमारस्ता आनीयातिमनोहराः ॥ ४१

तासां विचित्रमालानां मौल्यपृष्टे नृपात्मजैः ।
दीनाराणां सहस्रैकमयाचन्मौल्यमूर्जितम् ॥ ४२

अर्तिनस्ते वणिक्सूनोः पुण्याद्दशशतान्यपि ।
दीनाराणां प्रदायाशु जगृहुस्तास्स्रजोऽखिलाः ॥ ४३

तद्दीनारसहस्रं स नीत्वा तच्छ्रेष्ठिनो ददौ ।
पुत्रीदानं ततस्तस्मै तदा स प्रतिपन्नवान् ॥ ४४

इत्यादि प्रवराख्यातिमाकर्ण्य तस्य धीमतः ।
दिव्यरूपं विलोक्येत्य पृच्छन्नेनं नृपात्मजा ॥ ४५

शुभाद्गुणवती साध्याऽऽसक्ताभवत्तरां हृदि ।
पुनस्तच्चिन्तया नित्यं जायते क्षीणविग्रहा ॥ ४६

अन्यदा कुमरो द्यूते प्रधानादिसुतान् बहून् ।
द्यूतकर्ममदोपेतान् सजयल्लीलया शुभात् ॥ ४७

तत्र भूपात्मजोऽतीव विज्ञाय मदगर्वितः ।
दक्षोऽभयकुमाराख्या विख्यातोऽस्ति गुणोत्करैः ॥ ४८

स तदा कर्तुमारेभे विवादशरमोचनैः ।
समं धन्यकुमारेण धनुर्धरशतैर्युतः ॥ ४९

वैश्यःस्वाद्धुतपुण्येन दुर्दरं तमपि क्षणात् ।
विध्यचन्द्रकवेद्यं च जिगायाभून्महायशः ॥ ५०

ततोऽभयकुमाराद्याः ते प्रधानादि सूनवः ।
सर्वेऽप्यसहमानास्तं द्विषन्ति श्रेष्ठिनन्दनम् ॥ ५१

चिन्तयन्ति वधं तस्य केनचिद्धेतुना खलाः ।
कुमारस्तं न जानाति धर्मात्मा शुद्धमानसः ॥ ५२

अन्येद्युः गुणवत्यास्सत्कार्श्यस्य कारणं परैः ।
विज्ञाय श्रेणिकोऽप्राक्षीदालोच्यं स्वात्मजादिकान् ॥ ५३

किं तस्मै स्वसुतां दातुमुचितं वा न रूपिणे ।
ततोऽभयकुमारोऽसौ ब्रूत वाक्यं तदीर्षया ॥ ५४

नोचितं सर्वथा तस्मै कन्यादानं विदेशिनः ।
यतोऽस्य कुलजात्याद्या न ज्ञायन्ते शुभाऽशुभाः ॥ ५५

राजावोचत्स्फुटं तर्हि तदाकांक्षा स्मराग्निना ।
दह्यमाना कुमारीयं जीविष्यति कथञ्चिरम् ॥ ५६

पुनस्तदात्मजोवादीद्यावद्रूपी स जीवति ।
कुमार्याः कामदाहोत्थं दुःखं तावत्प्रवर्धते ॥ ५७

श्रेणिकः प्राह सोऽस्माभिर्निरपराधऊर्जितः ।
जातु मारयितुं नार्होऽशक्यते न्यायवर्त्मना ॥ ५८

अवादीत्स ततस्तर्हि स्वोपायेनैव केनचित् ।
विदेशी मारणीयोऽसौ धैर्यादि गुणगर्वितः ॥ ५९

राजा बभाण कोऽत्रास्ति ह्युपायस्तस्य मारणे ।
नृपसूनुर्बभाषे तदुपायं श्रृणु भूपते ॥ ६०

अतोऽस्ति नगराद्बाह्ये भवनं राक्षसस्य तम् ।
प्रविश्य बहवः पूर्वं मृता राक्षसपाणिना ॥ ६१

अतस्तद्भवनं धीरो यः प्रविश्यति पुण्यवान् ।
तस्मै निजार्धराज्यं च पुत्रीं दास्यामि निश्चितम् ॥ ६२

इत्याद्या घोषणा रम्या स्वपुरे कार्यते स वै ।
धृत्वा तां गर्वितस्तत्र प्रविश्याशु मरिष्यति ॥ ६३

तन्मन्त्रेण तदा राज्ञा तदाऽखिलेऽत्र कारिते ।
निषिद्धोप्यपरैर्वैश्यैः स्वपुण्यप्रेरितो बलात् ॥ ६४

धृत्वातां घोषणांशीघ्रमपराह्नैस्स लीलया ।
निजालयमिवाभीतः प्रविशद्राक्षसालयम् ॥ ६५

तस्य दर्शनमात्रेण शान्तरूपः स राक्षसः ।
भूत्वा सन्मुखमागत्य नत्वा तं दिव्यमानवम् ॥ ६६

उपवेश्याति सम्मान्य रम्ये दिव्यासने गिरा ।
उवाच तं शुभं वाक्यं स्वामिं स्त्वत्सेवकोऽस्म्यहम् ॥ ६७

इयन्तं कालमेवात्र त्वद्भाण्डागारिकोपमः ।
भूत्वामुं भुवनं तुङ्गमिदं द्रव्यं च रक्षयन् ॥ ६८

स्थितस्त्वमागतोऽस्याद्य गृहाणैतन्महद्धनम् ।
त्वत्पुण्योत्थं स इत्युक्त्वा द्रव्यराशिं समर्प्य ताम् ॥ ६९

तस्मै त्वच्चरणे नाहमागमिष्यामि नान्यथा ।
त्वदभृत्योऽस्मीति विज्ञाप्यातस्ततोऽदृश्यतामगात् ॥ ७०

कुमारो निशि तत्रैव शुभध्यानेन संस्थितः ।
अहो पुण्यवतां पुण्यात् सर्वत्र लाभऊर्जितः ॥ ७१

ताः कन्याः गुणवत्याद्यास्तस्य या भाविनी गतिः ।
सैवात्रास्माकमित्युक्त्या तस्थुर्निजप्रतिज्ञया ॥ ७२

प्रताः सामायिकादीनि कृत्वा धर्म शिवाप्तये ।
परानन्देन तद्गेहान्निर्ययौ नगरं प्रति ॥ ७३

तस्मात् प्राप्ति निधानं तं कुमारं निजलीलया ।
पुराभिमुखमागच्छन्तं विलोक्य नृपादयः ॥ ७४

पौराश्च परमाश्चर्यं प्राप्येत्य चिन्तयन् हृदि ।
अहो पुरुषसिंहोऽयमजय्यो नृसुरात्मनाम् ॥ ७५

पुण्याधिको विचिन्त्येति सम्प्रमेणास्य सन्मुखम् ।
राजाभयकुमाराद्या ययुरर्धपदं(थं)मुदा ॥ ७६

ततस्तं परया भूत्या प्रविश्य राजमन्दिरम् ।
सन्मान्य भूष(णा)द्यै(श्च) प्रच्छेति महीपतिः ॥ ७७

कस्या हो सत्कुलव्योम्नो धीमंस्त्यं चन्द्र ऊर्जितः ।
एकाकी पुण्यवानत्र कस्मात्किमर्थमागतः ॥ ७८

ततोऽवदीत्कुमारोऽहमुज्जयिन्यां शुभाशये ।
वैश्यात्मजो भ्रमंस्तीर्थयत्रिकोऽत्रागतस्ततः ॥ ७९

तदाकर्ण्य नृपस्तुष्टो विभूत्या परया समम् ।
कारयित्वा स्व सौधे सद्विवाहमण्डपादिकान् ॥ ८०

गुणवत्यादिकास्सर्वास्ताः षोडशकन्यकाः ।
महामहोत्सवेनास्मै विवाहविधिना ददौ ॥ ८१

पुनर्धन्यकुमाराय रत्नस्वर्णादि कोटिभिः ।
ग्रामदेशादिभिस्सार्धमर्धराज्यमदान्नृपः ॥ ८२

कुमारोऽथसुरैर्मान्योऽनेकवेश्यादिभिर्भृतम् ।
समन्तात्सुरधाम्नेऽस्य महात्पुरमवासयत् ॥ ८३

तत्र भूत्वा महान् राजा सेव्याङ्घ्रयब्जोनृपात्मजैः ।
कुर्वन् राज्यं मुदा सोऽस्ता जिनधर्मप्रभावकः ॥ ८४

इत उज्जयिनी पुर्यां कुमाराऽदर्शने तदा ।
राज्या जामात्र्यादि लोकानां यद्यभूद्दुःखमुल्बणम् ॥ ८५

तर्हि तन्मातृपित्रोः किं प्रष्ठव्यं दुःखसञ्चयम् ।
अन्तर्दाहकरं तीव्रं हग्वियोगोत्थशोकजम् ॥ ८६

तदैव निशि तत्सौधातृतरौ तौ सुतैः समम् ।
निर्धाटितो निधीनां च रक्षकैर्देवतागणैः ॥ ८७

प्राक्तने स्वगृहे गत्वा दावदग्धद्रुमोपमौ ।
महाशोकभराक्रान्तौ तस्थतु र्दुःखविह्वलौ ॥ ८८

तदापुरजनादीनं कौतुकं जातमित्यहो ।
सद्वज्रहृदयोवेतौ निष्ठुरौ पुण्यवर्जितौ ॥ ८९

यतस्तथाविधे पुत्रे गते जीवत एव तौ ।
अथवा दुःखिनां मृत्युर्नायाति दुर्विधेर्वशात् ॥ ९०

(तदानाचार)पापेन दिनैः कतिपयैः श्रियः ।
नूतनाः प्रक्तनाः सर्वास्तेषां नाशमगुर्गृहात् ॥ ९१

तदामीषां कुपुत्राणां पापिनां पापपाकतः ।
सन्देहश्चाभवद्धस्त्रावरणोदरपूरणे ॥ ९२

ग्रासाद्यऽभावतस्तस्माद्धनपालो वणिक्सुभात् ।
अपेक्ष्यकारणं किञ्चित् शालिभद्रस्यसन्निधिम् ॥ ९३

सुतस्य स्वभगिन्याः सतोऽतीव धनभागिनः ।
जगाम श्रेयसाकृष्ठस्तद्राजगृहवासिनः ॥ ९४

तत्रधन्यकुमारस्य प्रासादाग्रे स्थितोवणिक् ।
शालिभद्रस्य सद्देहं स पिरच्छति जनान् प्रति ॥ ९५

तुङ्गस्थानस्थितो धन्यकुमारो भूपति र्द्दशा ।
तं निरीक्ष्य परिज्ञाय यद्रागागत्य तदन्तिकम् ॥ ९६

ननाम स्वपितुः पादौ जीर्णवस्त्रावृतात्मनः ।
दीनाराङ्कसमानस्य श्रेष्ठिणोऽति दरिद्रिणः ॥ ९७

राजलोकास्तदा पौराः पश्यन्तस्तं स कौतुकाः ।
अहो किमिदमाश्चर्यं ब्रुवाण इति संस्थिताः ॥ ९८

धनपालस्तदाब्रूत नराधीशःस्वपुण्यतः ।
अखण्डित प्रतापोऽत्र भूत्वा पाहि चिरं महीम् ॥ ९९

मन्दभाग्योऽस्मि वैश्योऽहं पृथ्वीपतिस्त्वमूर्जितः ।
अतस्त्वं मे नमस्कारार्होऽस्त्यहं तेन जातुचित् ॥ १००

धन्योऽवोचद्भवान्मेऽत्र नमस्कारार्ह ऊर्जितः ।
यतस्त्वं मे पिता पूज्यस्ते पुत्रोऽहं लघुस्फुटम् ॥ १०१

तदाकर्ण्य स आनन्दोत्पन्नाश्रुपातवर्षमैः ।
कुर्यात्तकण्ठमाश्लिष्य रोदनं सूनुना समम् ॥ १०२

कुर्वन्तौ स्वाश्रुपातं तौ प्रधानाद्यै र्निवारितौ ।
तस्मात्प्राविशतां राजालयं प्रमोदनिर्भरौ ॥ १०३

तत्र धन्यकुमारस्तं वस्त्राभरण (भोजनैः)[1] ।
सुखीकृत्य निवेद्याशु भ्रातॄणां चरितं च तत् ॥ १०४

निजागमनवृत्तान्तं राज्यलाभादिकं तथा ।
सर्वं मात्रादि ब(न्धू) तां स्थितिक्षेमादि पृष्टवान् ॥ १०५

पिता बभाण सर्वेते मन्दभाग्याः सुतादयः ।
जीवन्तः केवलं सन्ति दुर्धियो दुःखपूरिताः ॥ १०६

---

1 - A

Dha - 18

किन्तु स्व प्राक्तने गेहेऽसतां तेषां हि तिष्ठताम् ।
धनधान्यादिकं चान्यतत्तत्र नास्त्यच्च भुज्यते ॥ १०७

तदा विनिर्गते तस्मान्महापुण्यवति त्वया ।
निधिरुक्षकदेव्याद्यैर्वयं निर्धाटिता निशि ॥ १०८

त्वत्पुण्यजनिताः सर्वाः श्रियस्त्वया समं ययुः ।
महापुण्योदयेनाशु दृष्टाऽसि त्वं चिरान्मया ॥ १०९

तदाकर्ण्य स धन्यात्मा नेतुं तान्सकलान्द्रुतम् ।
स्व भटान् प्राहिणोत्सार्धं वस्त्रधानादि वाहनैः ॥ ११०

प्रभावत्यादयः तस्माद्विभूत्यानन्दनिर्भराः ।
यानादीन् शीघ्रमारुह्य निर्ययुस्तत्पुरं प्रति ॥ १११

तदागमनमाकर्ण्य कुमारो भूमिपैर्वृतः ।
जगामार्धपदं (थं) भूत्या परया मातृसन्मुखम् ॥ ११२

आगच्छन्तीं पथि स्वाम्बां निरीक्ष्यभक्तिनिर्भरः ।
ननाम शिरसा धन्यः स्फुरन्मकुटशालिना ॥ ११३

तन्माता स्वसुतं दृष्ट्वा प्राप्यानन्दं परं मुदा ।
आलिङ्ग्य निर्भरं तस्मै स्वाशीर्वादान्बहून् ददौ ॥ ११४

तदा ते भ्रातरस्सर्वे स्वातीव लज्जया हृदि ।
आसन्नधोमुखास्तस्य मुखाब्जं द्रष्टुमक्षयाः ॥ ११५

सतांस्तथाविधान्वीक्ष्य प्राह हे भ्रातरोऽत्र मे ।
भवत्प्रसादतो जातं राज्यं श्रीस्त्र्यादि पूर्वकम् ॥ ११६

निःशङ्कास्सुष्टुनिःशल्या यूयं भवत निर्मला ।
यतश्शुभाऽशुभं पुंसां कर्मपाकेन जायते ॥ ११७

तदाकर्ण्य गुणव्रातैः स्तुत्वा ते तं स्व बान्धवम् ।
क्षेमयित्वा प्रियैर्वाक्यैः स्वत्मनिन्दावधूस्तराम् ॥ ११८

ततस्तै बन्धुभिस्सार्धं परया सम्पदानृपाः ।
प्रविश्य नगरं स्वस्य प्राविशन्निजमन्दिरम् ॥ ११९

तत्र तभ्योविधायाशु प्राघूर्णकक्रियां पराम् ।
स्नानभोजनवस्त्राद्यैर्हेमरत्नाधिकान्बहून् ॥ १२०

दत्वा वाहनवस्तूनि ग्रामादिंश्च मुदा ददौ ।
यथायोग्यं कुमारोऽसौ गृहीधर्मसुखाप्तये ॥ १२१

इति सुकृतविपाकात् प्राप्यराज्यादि लक्ष्मीं
सुरनरपतिमान्यो भोगसारान्भुनक्ति ।
विविध सुखसमुद्रान् बन्धुभिः सार्धमेष-
कुरुत सुकृतमेकं चेति मत्वा सुदक्षाः ॥ १२२

धर्मो विश्वहितं करो गुणनिदि धर्मं विदःकुर्वते
धर्मेणेहभवेत्सतां शुभगतिर्धमाय मुक्त्यै नमः ।
धर्मान्नास्त्यपरः परार्थजनको धर्मस्य बीजं सुदृक् -
धर्मो चित्तमहं दधामि भवतो मां पाहि धर्मद्रुतम् ॥ १२३

इति श्रीभट्टारकसकलकीर्तिविरचितेधन्यकुमारचरित्रे
राज्यप्राप्तिमात्रापित्रादिबन्धुवर्गसङ्गमो नाम
षष्ठोऽधिकारः
॥ श्रीरस्तु ॥

॥ अथ सप्तमोऽधिकारः ॥

श्री जिनाय नमः

वीतरागाञ्जगन्नाथां स्त्रिजगद्भव्यवन्दितान् ।
विश्वप्राणिहितान्वन्दे शिरसापरमेष्ठिनः ॥ १

अथ धन्यो महीपालो श्रीणां वाञ्छन्महत्फलम् ।
उत्तुङ्गतोरणोपेतान् जिनचैत्यालयान्बहून् ॥ २

हेमरत्नमयी बह्वीर्जिनेन्द्रप्रतिमाश्शुभाः ।
दीप्ता नेत्रप्रिया भूत्या क्रयित्वा शिवाप्तये ॥ ३

तासांतीर्थेशमूर्तीनां सङ्घैश्चतुर्विधैस्समम् ।
प्रतिष्ठां कारयामास धर्म वृद्ध्यै स भूतिभिः ॥ ४

ततो महार्चनाद्रव्यैरष्टभदैर्मनोहरैः ।
स्व सौधे जिनगेहेषु प्रतिमानां जिनेशिनाम् ॥ ५

करोति प्रत्यहं पूजां विश्वाभ्युदय साधिनीम् ।
परांश्च कारयेद्भक्त्या महोत्सवशतैकयम् ॥ ६

मध्याह्ने स्वगृहद्धारं पात्रदानाय पश्यति ।
ददाति चाप्यसत्पात्रं दानं स विधिना शुभम् ॥ ७

निर्गन्ध सद्गुरूणां च प्रणामं पूजनं सदा ।
भक्तिसेवां विधत्तेऽसौ समं भव्यैः शुभाप्तये ॥ ८

श्रृणोत्येषद्विधा धर्ममृषि (श्रावकगोचरम्)[1] ।
विश्वतत्वानि वैराग्याप्त्यै च श्रीसद्गुरोःर्मुखात् ॥ ९

चतुःपर्वसु सन्त्यज्य राज्यारम्भादि चिन्तनम् ।
नियमे नोपवासान् सः कुरुते स्वघहानये ॥ १०

भूत्वा मुनिसमो दक्षः शुद्धं सामायिकं शुभम् ।
कालत्रये करोत्येष आलम्ब्य समतां परम् ॥ ११

शङ्कादि दोषमाहात्म्यनिःशङ्कादि गुणाष्टभिः ।
दर्शनस्य विशुद्धिं स चकार शिवशर्मणे ॥ १२

ज्ञानाभ्यासं सदा कुर्याद्धि द्धानेषबुधैः समम् ।
अज्ञानहानये ज्ञानप्राप्त्यैत्रैलोक्यदीपकम् ॥ १३

श्रावकव्रतसाराणि स्वयोग्यानि निरन्तरम् ।
अतिक्रमाद्दते यत्नात्रि सुद्धय पालयेत्सुधीः ॥ १४

चिन्तयेत्सःसदा धर्मं चित्तेतल्लक्षणानि च ।
धर्मं वाचा वदेत्मुक्त्यै स्वजनान्यजनान्प्रति ॥ १५

कायेन कुरुते धर्मं कारयच्छ्री जिनोदितम् ।
इत्येषकृतयोगाद्यैर्धर्मैर्धर्ममयोऽभवत् ॥ १६

इत्याद्यैः प्रवराचैरैः स्वयञ्च कारितादिभिः ।
धर्ममेकं विधत्ते स सर्वशक्त्या सुखाकरम् ॥ १७

धर्माद्धिश्चार्थसारास्तिरर्थात्कामसुखं महत् ।
कामत्याग्गात्क्रमान्मोक्षोऽनन्तसौख्यार्णवश्शुभः ॥ १८

विज्ञायेति स धर्मात्मा शश्वत्सर्पार्थसिद्धये ।
करोति प्रत्यहं दर्मं मनोवाक्कायकर्मभिः ॥ १९

धर्मपाकोद्भवान्भोगान् राज्यारामादि गोचरान् ।
परान् नानाविधान्सारान् भुंजानोऽसौ निरन्तरम् ॥ २०

धर्मशर्माकरीभूतो निमग्नः सुखवारिधौ ।
अजानन् स्वगतं कालं तस्थौ भूपादि सेवितः ॥ २१

एकदा स सुभद्राया स्वकान्तायाः मुखाम्बुजम् ।
म्लानं विरुपकंस वीक्ष्य पप्रच्छेति गिराऽऽशुताम् ॥ २२

प्रीये ते वदनेऽऽद्यैव संज्ञातं केन हेतुना ।
वैरूप्य मलानभावादि शोकोत्पन्नमिवाशुभम् ॥ २३

सा बभाण ममभ्राता शालिभद्रो मनःप्रियः ।
दीक्षा मात्रमनाधर्मवैराग्यं भावयन् हृदि ॥ २४

संसारदेहभोगश्री कुटुम्बादिषु निस्पृहः ।
तपोभ्यासं सदाकुर्वन्नास्ते गेहे विरक्तया[1]॥ २५

तद्वि(योगे)त्थसोकेनं दुःखं मे वर्तते महत् ।
हृदि तेन मुखेप्यासीद्वैरूप्यं दुःखसूचकम् ॥ २६

तच्छ्रुत्वा धन्यराजा सोऽवोचत्प्रिये तं ऊर्जितम् ।
गत्वाहं बोधयिष्यामि दुःखहान्यै शिवाप्तये ॥ २७

सत्य ते च ममाप्याऽऽशुयुक्त्या सर्वार्थसिद्धये ।
इहामुत्र हितैर्वाक्यैः दुःखशोकादिकं त्यज ॥ २८

इत्युक्त्या तां ससन्तोष्य गत्वाऽऽशुतद्गृहं नृपः ।
स्वस्यालकं विरक्तं तं विलोक्याऽऽहेति सद्गिरा ॥ २९

धीमं स्त्वं साम्प्रतं प्रीत्या किं नागच्छसि मद्गृहम् ।
स उवाच महादुष्क रसंयमादि सिद्धये ॥ ३०

---

1 धीः - A

नानाभेदं तपोऽभ्यास वृद्धियुक्तं निजालये ।
कुर्वंस्तिष्ठामि तस्मात्ते नागच्छाम्यधुना गृहम् ॥ ३१

ततो धन्यो बभाणेति दीक्षर्थी त्वं यदि स्फुटम् ।
तर्हि गृहाण शीघ्रं तां तपोऽभ्यासेन किं फलम् ॥ ३२

प्राक्तना वृषभाद्या ये वर्षादि योगधारिणः ।
तपसाऽऽगुःशिवं तैः किं तपोऽभ्यासो गृकृतः ॥ ३३

किन्तु पूर्वं महद्राज्य सुखं भुक्त्वा निरन्तरम् ।
अनेकपर्वपर्यन्तं स्वेच्छया पुरुषोत्तमाः ॥ ३४

सहसा वीक्ष्य किञ्चिच्चाभ्रादि वैराग्यकारणम् ।
त्यत्क्वा भोगांस्तपः कृत्वा विधीन्हत्वा शिवं ययुः ॥ ३५

कातरस्त्वं तपोऽभ्यासं कुर्वंस्तिष्ठाधुनाप्यहम् ।
गृह्णामि दुष्करां दीक्षां तपोऽभ्यासाद्दतेऽद्भुतम् ॥ ३६

अत्र न ज्ञायते पापी यमो विश्वक्षयङ्करः ।
त्वां वा मां वा पराञ्नेतुं कदा किलागमिष्यति ॥ ३७

यतः कांश्चिच्च गर्भस्थान् कांश्चिदतीवबालकान् ।
कांश्चित्कौमार तां प्राप्तान् कांश्चित्सद्यौवनाङ्कितान् ॥ ३८

वृद्धान्वान्यान् परान् दीनान् सुखिनोवातिदुःखिनः ।
धनिनो निर्धनान् सर्वान् मारयेत्स्वेच्छयान्तकः ॥ ३९

यावद्यमोऽत्र नायाति नेतुं जीवान् विधेर्वशात् ।
तावद्दीक्षां मुदा(दाय)' कर्तव्यं स्वहितं बुधैः ॥ ४०

राक्षसीव जरायावन्नगृह्णाति निजं वपुः ।
तावत्स्वर्मोक्षसौख्याय ग्राह्या दीक्षा हितार्थिभिः ॥ ४१

जराजर्जरिते काये तपोभाराक्षमे यतः ।
शक्यते न तपः कर्तुं वृत्तं पालयितुं क्वचित् ॥ ४२

पटूनि यावदक्षाणि स्वस्वकार्यकराण्यहो ।
अधैर्यः संयमस्तावद्दुष्करो भवहानये ॥ ४३

मन्दाक्षाणां यतः पुंसां कुतोऽहिंसादि संयमः ।
संयमेन विना सर्वं तपः किं सत्फलं भवेत् ॥ ४४

अद्य वा प्रातरन्येद्युः गृहीष्यामि तपो व्रतम् ।
इत्थं ये चिन्तयन्त्यत्र यमान्तं यान्ति ते क्षणात् ॥ ४५

प्रातदर्भदलाग्रस्थ बिन्द्धाभं जीवितं चलम् ।
यौवनं क्षणविध्वंसिचात्र छायोपमो नृणाम् ॥ ४६

स्त्रियोऽतिचपलास्सर्वा वेश्या इव दुराशयाः ।
प्राथ्याच्छौरादि भूपाद्यैर्दुःखदा दुखसम्भवाः ॥ ४७

राज्यं रजो निभं निन्द्यं विश्वपापकरं चलम् ।
चिन्तादुःखशतैः पूर्णं पालयेत्कः सुधीश्चिरम् ॥ ४८

मोहवल्यः स्त्रियः सर्वाः कृत्स्नानर्थकराः खलाः ।
गृहवासो जिनैः र्निन्द्यः पापारम्भार्णवः सताम् ॥ ४९

सप्तधातुमयं निन्द्यं पूतिगन्धं कलेबरम् ।
पञ्चाक्षतस्करावासं भोगैः कः पोषयेद्बुधः ॥ ५०

अतृप्तिजनकः भोगाः समस्ताघनिबन्धनाः ।
शर्मणे किं सतां स्युः स्त्री निन्द्यद्वारोद्भवाःखलाः ॥ ५१

अन्तानन्तदुःखाब्धिः संसारो विषमश्चलः ।
चतुर्गतिमयो सारः प्रतये त्वात्र धीमताम् ॥ ५२

इत्याद्यैर्वचनैः पथ्यैरनित्यादिक सूचकैः ।
उत्पाद्य तस्य वैराग्यं सर्वत्र संयमाप्तये ॥ ५३

तस्माद्द्विद्धगुणसंवेगं स्वयंप्राप्य ततो द्रुतम् ।
धन्यो धन्यकुमारोऽयं निर्ययौ स्वगृहं प्रति ॥ ५४

शालिभद्रोऽपि वीक्ष्याशु साहसं तस्य धीमतः ।
परं त्यक्त्वाखिलां लक्ष्मीं तत्पृष्टे निर्गतो गृहात् ॥ ५५

गृहमागत्यधन्यात्मा निधाय स्वपदेद्रुतम् ।
स्वपुत्रं विधिना ज्येष्ठं धनपालाख्य मूर्जितम् ॥ ५६

क्षमितव्यं विधाय श्री श्रेणिकादि नृपां परैः ।
जननी जनकाभ्यां च जगामभ्रातृभिस्समम् ॥ ५७

शालिभद्रादिभिर्वैश्यैरपरैः सुभटादिकैः ।
श्रीवर्धमाननाथस्य जगामास्थानमण्डल(प)म् ॥ ५८

तत्र तं त्रिजगन्नाथं महावीरं जगद्गुरुम् ।
त्रिः परित्य प्रणम्योच्चैः शिरसाभ्यर्च्य भक्तितः ॥ ५९

दिव्यैः पूजामहाद्रव्यैरष्टभैदैः गुणोत्करैः ।
स्तोतुं प्रारेभिरे धन्यप्रमुखास्ते तपोर्थिनः ॥ ६०

त्वं देव जगतान्नाथो हितः स्वामी महान् गुरुः ।
निष्कारण जगद्बन्धुर्जगत्रातुं क्षमो भवान् ॥ ६१

नोऽद्यैव सफलै नेत्रे स्वामिंस्त्वदङ्घ्रिवीक्षणात् ।
करौ च सफलो धन्यौ त्वत्पदाम्बुजपूजनात् ॥ ६२

अद्यात्र सार्थकौ पादौ नोयत्रागमनात्तव ।
जीवनं जन्म सार्थं च प्रणामात्सफलं शिरः ॥ ६३

अद्यनः सफला जिह्वा पूज्यते गुणसंस्तवात् ।
सार्थकं च मनोध्यानगुणग्रामादि चिन्तनात् ॥ ६४

पवित्रं[1] सफलं गात्रं त्वदङ्घ्रिसेवनाच्च नः ।
कृतार्थश्च वयं धन्या जातस्त्वद्भक्तिवासिताः ॥ ६५

संसाराब्धिरपारोऽयं चूलकाम्बुप्रभोऽद्य नः ।
भासते पोतसादृश्यं त्वमासाद्यभवान्तकम् ॥ ६६

येऽनन्ताः सद्गुणानाथ तव स्मृत्या गणाधिपैः ।
कथं स्तुत्या हि तेऽस्माभिर्महान्तोऽल्पश्रुतान्वितै : ॥ ६७

अतो देव नमस्तुभ्यं नमोऽनन्तगुणात्मने ।
नमो दृग्ज्ञानचरित्र धर्मादि रत्नदायिने ॥ ६८

इति सितुति नमस्कारफलेन देव देहि नः ।
सम्यङ्घृग्ज्ञानचारित्र त्रितयं तपसा समम् ॥ ६९

वा सम्यक्त्वादि सर्वेषां निष्पत्यै शिवकारिणीम् ।
त्वदयामार्हतीं दीक्षामस्माकं देहि मुक्तये ॥ ७०

इत्यभिष्टुत्य तीर्थेशं प्रणम्य प्रार्थय तेऽखिलाः ।
श्रीवीरधन्विना धन्य शालिभद्रादयो मुदा ॥ ७१

सर्वान् बाह्यान्तरान् ग्रन्थान् मनोवाक्कायशुद्धिभिः ।
सर्वत्र ममतां त्यक्त्वा शाश्वत श्रेयसिद्धये ॥ ७२

---

1 अद्य मे - A

महाव्रतादिकान् सर्वान् आचार्यमूलसद्गुणान् ।
जगृहुः परमां दीक्षां विश्वार्च्यां मुक्तिमात्रकाम् ॥ ७३

ततो ग्रोग्रतपांस्येते द्विषड्भेदयुतान्यपि ।
स्ववीर्यं प्रकटीकृत्याघहान्यै कर्तुमुद्ययुः ॥ ७४

अङ्गपूर्वाणि साराणि निष्प्रमादाः पठन्ति ते ।
अज्ञानहानये नित्यं केवलज्ञानहेतवे ॥ ७५

गिरिकन्दरशून्यागरश्मशानगुहादिषु ।
निर्जनेषु प्रदेशेषु भीमाटवी वनादिषु ॥ ७६

निर्भयाहंसादृश्याः ध्यानाध्ययनसिद्धये ।
रत्नाविधासनारूढा जागरूका वसन्ति ते ॥ ७७

नानादेशपुरग्रामखेट[1]दुर्गादि भूमिशु ।
विहरन्ति सदाचारा धर्म प्रवृत्त येऽनिशम् ॥ ७८

अटव्यादौ व्रजन्तस्ते यत्रास्तं याति भास्करः ।
कायोत्सर्गेण तत्रैव तिष्ठन्त्यङ्गदयाप्तये ॥ ७९

झञ्झावाताकुले घोरे वृक्षमूलेऽतिदुःखदे ।
सर्पवृश्चिकदंशादि व्याप्तेऽतीव भयङ्करे ॥ ८०

त्यक्त्वा देहममत्वादींश्चतुर्मासावधिं परम् ।
ध्यानपूर्वं महायोगं वर्षाकाले च गृह्णते ॥ ८१

चत्वरे वा सरित्तीरे शीतदग्घनगा इव ।
शीतकाले स्थितिं कुर्युस्ते सध्यानाग्निकारिणः ॥ ८२

---

1 ग्रामखेटादि विवरणार्थं सरस्वतीमहाल् ग्रन्थालये मुद्रितनागकुमारकाव्यं पश्यताम् - पु-सं- 5 & 6

भानूग्ररश्मिसन्तप्ते ग्रीष्मेह्युग्रशिलातले ।
ज्वलज्ज्वालोपमेऽतीव दुस्सहे कर्महानये ॥ ८३

कायोत्सर्गेण धीरास्ते तिष्ठन्ति सूर्यसन्मुखः ।
स्वात्मध्यानसुधापानरताः स्वानन्दपूरिताः ॥ ८४

इत्यादि बहुधाकायक्लेशं कुर्वन्ति तेऽखिलाः ।
स्वसिद्धान्तनुसारेणाह्नतशर्मगुणाप्तये ॥ ८५

क्षुत्तृषादीन् महाघोरान् द्धाविंशति पुरीषहान् ।
वनस्थोपद्रवान्सर्वान् सहन्ते ते शुभाशयाः ॥ ८६

हत्वा ह्रदार्तरौद्राणि धर्मशुक्लानि सर्वदा ।
ध्यानानि निर्जिताक्षास्ते ध्यायन्ति कन्दरादिषु ॥ ८७

महाव्रतविशुद्धयर्थं पञ्चर्विंसतिभावनाः ।
वैराग्यवृद्धये सर्वानुप्रेक्षा द्धिषड्विधा ॥ ८८

धर्मवृद्ध्यै क्षमादीनि लक्षणानि दशान्वहम् ।
दृग्विशुद्धौ च तत्त्वानि सिद्ध्यै स्वात्मानमञ्जसा ॥ ८९

मनः पञ्चाक्षरोधाय यत्नेन श्रीजिनागमम् ।
भावयन्ती मुनीन्द्रास्ते निर्विकल्पेन चेतसा ॥ ९०

इत्याद्यैः प्रवरैर्योगैः तपोभिः दुष्करैस्समम् ।
यावज्जीवं प्रयत्नेन पालयन्ते सु संयमम् ॥ ९१

अन्ते धन्यकुमारोऽसौ मुनीनां नायको महान् ।
त्यक्त्वा चतुर्विधाहारान् कायादौ ममतादिकान् ॥ ९२

एकाकी चाद्रिवत्स्थित्वा प्रदेशे निर्जने वने ।
एकस्मिन्विधिना धीरस्सन्यासमाददौ स्वयम् ॥ ९३

क्षमाद्यैस्सद्गुणैः पूर्वं कृत्वा सल्लोखनां पराम् ।
कषायाणां वपुः सल्लोकनां कर्तुं समुद्ययौ ॥ ९४

शोषयित्वाखिलां गात्रमुपवासैष्च केवलम् ।
कायसल्लेखनां चक्रे जित्वा क्षुधादि दुस्सहान् ॥ ९५

शुष्कोष्ठवदनोऽप्येष धैर्यशालीमहामनाः ।
चर्मास्थिमात्राशेषाङ्गोमहासत्वो महाक्षमः ॥ ९६

दर्शनज्ञाचारित्र तमसां मोक्षकारिणाम् ।
सम्यग्गाराधनाः सारा आराधयत्प्रयत्नतः ॥ ९७

परमेष्ठी पदादीनां ध्यानं च परमात्मनः ।
प्राणान्तं स व्यधाद्दक्षो निर्विकल्पपदं गतः ॥ ९८

